॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीलक्ष्मीहयवदनपरब्रह्मणे नमः ॥



# हवनपद्धतिः



लेखकः/सङ्ग्राहकः

अनन्तश्रीविभूषित पराङ्कुशाचार्य श्रीशठकोप यतिराज रामानुज

जीयर स्वामीजी

upayogibooks.com

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीलक्ष्मीहयवदनपरब्रह्मणे नमः ॥

# हवनपद्धतिः

लेखकः/सङ्ग्राहकः

अनन्तश्रीविभूषित पराङ्कुशाचार्य श्रीशठकोप यतिराज रामानुज जीयरस्वामी

सर्वाधिकारः

प्रकाशकाधीने निहितः

प्रकाशकः

श्रीशुकदेव भागवत आश्रम, (श्रीलक्ष्मीहरि मन्दिर) गैंडाकोट-१, नवलपुर

लेखक/संग्राहकः : अनन्तश्री विभूषित त्रिदण्डी
श्रीपराङ्कुशाचार्य स्वामीजी
कृतिः : हवनपद्धतिः
विधा : कर्मकाण्डम्
प्रकाशकः : श्रीशुकदेव भागवत आश्रम
श्रीलक्ष्मीहरि मन्दिर
गैंडाकोट न.पा.-१, नवलपुर
प्रकाशन मितिः : बृहद् आचार्य अभिनन्दन समारोह, २०७९
संस्करणम् : पञ्चमम्
सर्वाधिकारः : प्रकाशकाधीने
प्रतिः : १५००
सहयोगः : रु. ३००/-
ISBN : 978-9937-0-6532-0
मुद्रणम् : क्वालिटी प्रेस
भरतपुर, चितवन, फोन : ०५६-५९४२०१

# प्राक्कथनम्

श्रीवैष्णवाः खलु कर्मात्यन्तं स्पृहयन्ति । यतो हि वैष्णवास्ते यज्ञपुरुषोहि विष्णुस्तदिष्टास्ते कथं तदाराधनरूपं कर्मं न स्पृहयेयुः । यागो हि नाम देवतोद्देश्येन द्रव्यत्यागात्मकः स च परदेवताविषय एव कर्तव्यः । परादेवता तु विष्णुरेवनात्रकार्या विचिकित्सा विचिकित्साचिकित्सकानां परः सहस्रं प्रमाणानां सद्भावात्। तत्संग्रहञ्च तत्वमुक्ताकलापादौ द्रष्टव्यः । तत्रापि श्रमो मास्तु । श्रीविष्णुपारम्यं सर्वलोक प्रसिद्धं संकल्पवाक्यादेव सुतरामवगम्यते । तद्यथा यं कमपि देवमाराधयितुं यागो विधीयतां तत्र सर्वत्रापि संकल्पवाक्ये ॐ तत् सत् इति परब्रह्मणो नामत्रयमुच्चार्य तत्त्रयमुद्देश्यकोटौ निवेश्य ॐ तत् सत् इति प्रतिपाद्यं ब्रह्म किं रूपमित्याशङ्कायां विष्णुरिति विधीयते । ॐ तत् सदितिशब्दत्रयस्य परब्रह्माभिधायकत्वञ्च सर्वशास्त्रसिद्धम् । तदेवोङ्कारादि वाच्यं ब्रह्म विष्णुरेवेति उद्देश्यविधेयदलद्वयमेव त्रिकञ्चोच्चार्यते । एवं वैदिकसङ्कल्पवाक्यादेव विष्णुपारम्यं सिद्धम्। एतदेव सर्वं हृदिनिधाय यामुनमुनिरभ्यधात्। "**स्वाभाविकानवधिकातिशयेशितृत्वं नारायण त्वयि नमृष्यति वैदिकः कः**"इति सद्वैदिकः विष्णुपारम्यमवश्यं स्वीकुर्यादेवेति हार्दम् । सत्पदवाच्यत्वे सिद्धे तस्मिन्नेव निखिल कारणत्वमपि स्वतः सम्पद्यते । सत्पदवाच्यस्य जगत्कारणत्वं छान्दोग्यादिश्रुतिसिद्धम् । संकल्पवाक्येऽग्रेऽपि महापुरुषस्य विष्णोराज्ञयैव चतुर्मुखस्य सृष्टौ प्रवृत्तत्वमभिधाय कैमुतिकन्यायेन सकलस्य स्वस्वकर्मसु प्रवृत्तिस्तदधीनेति निश्चीयते ।

इत्थञ्च विष्णौ सर्वप्रवर्तकत्वसर्वकारणत्व सर्वस्वामित्वादि श्रुत्युक्तगुणान् स्वीकृत्यैव वैदिककर्मारभ्यत इति सिद्धम् । एवञ्च संकल्पवाक्यमेव श्रीवैष्णवसिद्धान्तपारम्यप्रतिपादकमिति तादृश संकल्प वाक्यप्रधानं यागादिकं श्रीवैष्णवाः सामोदं सम्पादयन्तितमां यज्ञे कर्मणि

कर्मकाण्डविषयकपुस्तकसङ्कलनाय प्रेरिताः। एतद्विधमहापुरुषप्रेरणया सर्वसहयोगेन च ग्रन्थान्तराण्यपि शीघ्रं प्रकाश्यमेष्यन्तीति विश्वासो वरीवर्ति। यैरस्य प्रकाशनाय साहाय्यमाचरितं ते सर्वेपि धन्याभिख्याशतैः सत्क्रियन्ते। परिशिष्टे च वैष्णवेष्ट्यादिविधानलेखनेन ग्रन्थस्यास्योपयोगित्वमधिकं भविष्यतीति विश्वासः।

विद्वद्विधेयः जगन्नाथः
प्राध्यापक नेपाली विभागः
सम्पूर्णानन्द संस्कृत विश्वविद्यालय वाराणसी।

संस्कृताग्नावाज्यादिकरणको होमः प्रामुख्यमावहति "त्वं मुखं सर्वदेवानां सप्तार्चिरमितद्युते" इत्युक्तप्रकारेणाग्निमुखेनैव देवाह्यश्नुवन्तीति । सर्वदेवमयस्य विष्णोराराधनेऽपि हवनं विधीयते।

वह्निरूपेण सर्वकर्मसाक्षिभूतः परमात्मैव पूज्यते नान्यः । इष्टदेवताभीष्टफलभेदेन हवनविधिरपि क्वचिद् भिन्नतामपि लभते। परमवैदिकपाञ्चरात्रसंहितासु भगवत्पार्षदादिनामभिर्हवनंविधीयते। यत्रकुत्रचित् स्मार्तहवनविधितो वैलक्ष्यण्यमपि दृश्यते। मोक्षार्थिभिः पाञ्चरात्रानुसारेणात्मानं संस्कृत्य तदुक्तविधिनैव हवनतर्पणपूजनादिकं विधेयं तस्य श्रीपाञ्चरात्रस्य प्रामाण्यं सर्वदेशग्राह्यत्वञ्चागमप्रामाण्यादिषु सुस्पष्टं द्रष्टव्यम् । तस्मादियं पाञ्चरात्रसंहितानुसारिणी मुमुक्षुभिः संस्कृतात्मभिः श्रीवैष्णवैरुपादेया हवनपद्धतिरुदभूत् । श्रीवैष्णवपुस्तकप्रकाशनेन द्वितीयपुष्परूपेणेयं समुपाह्रियते विद्याविवेकविविक्तचेतसां सचेतसां विदुषाङ्करकमलेषु ।

पितृयागपद्धतिश्च इतः पूर्वमस्माभिरेव प्रकाशिता श्रीवैष्णवेषु नितरां प्रमोदाय जातेति प्रमुदितमनसो विज्ञापयामः । पद्धति संग्राहकाचार्यचरणानां दूरस्थत्वेन अस्माकं कार्यान्तरजालपारवश्याच्च यत्र तत्र स्खालित्यानि स्युरेव संशोध्य पुनः प्रकाशनाय सूचयितव्यानि तानीति निवेदयामः । केषाञ्चिद् वैदिकाक्षराणामभावाद्यथा तथा निर्व्यूढमस्ति । वैष्णवेष्टिविधानमपि बृद्धहारितस्मृतित उद्धृत्यपरिशिष्टे दत्तमस्ति । श्रीमदाचार्यचरणैः दक्षिणोत्तरदेश वास्तव्यानेकश्रीवैष्णवाचार्यप्रेरणया पद्धतिरियं पाञ्चरात्रसंहितामनुसृत्य पूर्वमेवसङ्कलितासीत्। तेषामेवादेशेन चित्रवन मण्डलं गतवतोजनस्यास्य ग्रन्थस्यैतस्य प्रकाशनाय बहुभिर्भक्तवरैः सहर्षसह्योगो विहितः। श्रीमत्प्रतिवादिभयङ्कराचार्यानन्ताचार्यचरणाश्रितदुग्धैकजीवनोपायैर्योगिराजस्वामिवर्यैश्चास्याः प्रकाशनाय सद्द्रव्यदानपूर्वकं भृशमुद् बोधिताः तैरेव ग्रन्थकाराः

# किञ्चिद्वक्तव्यम्

सर्वेष्वपि कर्मसु तेषां पूर्णतायां कर्मान्ते मध्ये वापि कर्तव्यतायां सर्वैकमत्यं दृश्यते । स्मार्तैः संकलितेषु साम्प्रतं दृष्टचरेषु विविधेषु हवनपद्धतिषु गृह्यसूत्रभेदेन निगमागमभेदेन चेति कर्तव्यतायां नैकमत्यं संभवम् । अस्माकं प्रपन्नानान्तु स्मार्तसंकलितग्रन्थानुरूपेण पूजनं हवनं शास्त्रविरुद्धं स्वरूप विरुद्धञ्च भवत्येव नात्र मनागपि संदेहावकाशः। अतो वैष्णवीयपाञ्चरात्रागमानुसारनिर्दिष्टमार्गानुरूपवैदिकपद्धतिमवलम्ब्य सर्वास्वपि श्रीवैष्णवगोष्ठीषु सरलतामेकरूपताञ्च कमपि पूर्णं पुस्तकं सङ्कलनमावश्यकमासीत् । तस्य परिपूर्तये श्रीमद्वेदमार्गेत्यादि गुणगणसमलंकृतैः श्रीशठकोपरामानुजजीयरस्वामिभिः सङ्कलितं हवनपद्धतिनामकं पुस्तकं पूर्वं वाराणस्यां सम्पाद्य प्रकाशितं तत्रापि प्रकाशने सम्पादने च किञ्चिन्न्यूनतां विलोक्य पुनः संशोध्य प्रकाश्यते इति मोदमावहते दासस्यास्य चेतः । श्रीवैष्णवपरिषदः तादृशप्रकाशनकार्येषु सम्मतमस्त्येव किमधिकं श्रीवैष्णवविशिष्टाद्वैतसिद्धान्तनिष्ठागरिष्ठानां शास्त्रैकलोचनानां विदुषाम्।


देवराजश्रीनिवास रामानुजदासः

अध्यक्षः श्रीवैष्णवपरिषन्नेपालस्य।

# विषयानुक्रमणिका


| क्रमाङ्कः | | पृष्ठाङ्कः | क्रमाङ्कः | | पृष्ठाङ्कः |
|---|---|---|---|---|---|
| १. | कर्मपात्रविधिः | ९ | २५. | स्थितिन्यासः | ५० |
| २. | पञ्चगव्यविधिः | १० | २६. | भगवदाराधनाविधिः | ५१ |
| ३. | प्रतिज्ञासङ्कल्पः | १२ | २७. | पुरुषसूक्तन्यासः | ५२ |
| ४. | गोदानविधिः | १३ | २८. | पुष्पाञ्जलिः | ५९ |
| ५. | भुवः पञ्चसंस्काराः | १७ | २९. | श्रीकृष्णाष्टोत्तरशत० | ६० |
| ६. | स्वस्तिवाचनम् | २० | ३०. | श्रीलक्ष्म्यष्टोत्तरशत० | ६४ |
| ७. | गौरसर्षपैर्दिग्रक्षणम् | २१ | ३१. | अग्निकुण्डकृत्यम् | ६८ |
| ८. | दिक्पूजनम् | २२ | ३२. | अग्निसंस्काराः | ६९ |
| ९. | भूपूजनम् | २४ | ३३. | अष्टवसुपूजनम् | ७४ |
| १०. | वराहपूजनम् | २६ | ३४. | ब्रह्मपूजनम् | ७५ |
| ११. | अनन्तपूजनम् | २७ | ३५. | आसनविधानम् | ७५ |
| १२. | कूर्मपूजनम् | २८ | ३६. | प्रोक्षणी प्रणीते | ७६ |
| १३. | दीपपूजनम् | २८ | ३७. | आज्यस्थालीविधिः | ७९ |
| १४. | प्रधानकलशपूजनम् | २९ | ३८. | चरुस्थाली विधिः | ८० |
| १५. | विष्वक्सेनपूजनम् | ३३ | ३९. | परिधिः | ८५ |
| १६. | वरुणपूजनम् | ३७ | ४०. | इध्माधानम् | ८५ |
| १७. | ब्राह्मण वरणम् | ३७ | ४१. | पञ्चवारुणिहोमः | ८७ |
| १८. | पुण्याहवाचनम् | ३८ | ४२. | सूक्तपञ्चकहोमः | ८९ |
| १९. | वरुणपवमानसूक्ते | ३९/४० | ४३. | मध्यमहोमः | १०० |
| २०. | पाञ्चरात्रागममन्त्राः | ४२ | ४४. | उत्तरहोमः | १०० |
| २१. | वास्तुसूक्तम् | ४५ | ४५. | वैकुण्ठपार्षदहोमः | १०३ |
| २२. | रक्षाकङ्कणम् | ४६ | ४६. | अष्टवसुहोमः | १०८ |
| २३. | संहारन्यासः | ४९ | ४७. | दिक्पालहोमः | १०९ |
| २४. | सृष्टिन्यासः | ४९ | ४८. | प्रायश्चित्तहोमः | १११ |

| क्रमाङ्कः | पृष्ठाङ्कः |
|---|---|
| ४९. स्वीष्टकृद्धोमः | ११२ |
| ५०. कर्मसाद्गुण्यहोमः | ११३ |
| ५१. पूर्णाहुतिः | ११४ |
| ५२. उत्तरपरिषेचनम् | ११४ |
| ५३. दिक्पालबलिः | ११५ |
| ५४. ब्रह्मविसर्जनम् | ११६ |
| ५५. परिधि होमः | ११७ |
| ५६. परिशिष्टे प्रमाणप्रकरणम् | ११९ |
| ५७. परिशिष्टे वैष्णवेष्टिविधानम् | १२४ |
| ५८. सुमङ्गलस्तोत्रम् | १२९ |
| ५९. मङ्गलआरतिः | १३० |

श्रीमतेरामानुजाय नमः।

श्रीमद्रामानुजं वन्दे रङ्गसूरिञ्च सद्गुरुम्।
सुदर्शनगुरुञ्चैव गोपालार्यञ्च मद्गुरुम् ॥

# हवनपद्धतिः प्रारम्भः

## तत्रादौ कर्मपात्रविधानम्

**कर्मपात्रे शङ्खचक्रे विलिख्य तमभिमन्त्रयेत्—**

ॐ यद्देवादेवहेडनन्देवासश्चकृमाव्वयम्।
अग्निर्म्मा तस्मादेनसो विश्वान्मुञ्चत्व ँ हसः।
ॐ यदिदिवा यदिनक्तमेना ६ सि चकृमाव्वयम्
वायुर्म्मातस्मादेनसो विश्वान् मुञ्चत्व ँ हसः॥
ॐ यदि जाग्रद्यदिस्वप्नऽएना ँ सि चकृमा वयम्।
सूर्यो मा तस्मादेनसो विश्वान् मुञ्चत्व ँ हसः॥

**कर्मपात्रे पवित्रनिक्षेपः—**

ॐ पवित्रेस्थोव्वैष्णव्यौसवितुर्वः प्प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्यते पवित्रपते पवित्रपूतस्य यत्कामः पुनेतच्छकेयम् ॥

**कर्मपात्रे जलनिक्षेपः—**

ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये। शंयोरभि स्रवन्तु नः।

**तिलनिक्षेपः-**

ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः। प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान् प्रीणाहि नः स्वाहा॥

**यवनिक्षेपः-**

ॐ यवोसियवयास्मद्द्वेषोयवयारातीर्दिवेत्वान्तरिक्षायत्वा पृथिव्यैत्वा शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ॥

**पुष्पनिक्षेपः-**

ॐ श्रीश्चते लक्ष्मीश्चपत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ॥

**गन्धनिक्षेपः—**

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

**अक्षतनिक्षेपः—**

ॐ अक्षन्नमीमदन्तह्यवप्रियाऽअधूषत ।
अस्तोषतस्वभानवो व्विप्रानविष्टया मतीयोजान्विन्द्रते हरी ॥

ततोऽभिमन्त्रितजलेन यज्ञीयद्रव्यं यजमानञ्चाभिषिञ्चेत् ।

ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ।
ओमपुण्डरीकाक्षः पुनातु-३

## पञ्चगव्य विधानम्

अथ वेद्याः पूर्वस्यां दिशि तण्डुलादिना चतुरस्रं स्थण्डिलं कृत्वा कुंकुमादिना कोष्ठपञ्चकं विधाय प्राच्यां पलमेकं गोमूत्रं । दक्षिणे अंगुष्ठार्धं गोमयं प्रतीच्यां सप्तपलं गोक्षीरमुदीच्यां पलत्रयं गोदधि मध्ये पलमेकं गोघृतमैशान्ये पलमेकं कुशोदकं स्थापयित्वा गोमूत्रे विष्णुमावाह्य

पूजयेत्– ॐ विष्णोरराटमसि विष्णोः स्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि वैष्णवमसि विष्णवे त्वा ॥ॐ विष्णवे नमः विष्णुमावाहयामि स्थापयामि पूजयामीति पूजयेत्।

**गोमये ब्रह्माणमावाह्य पूजयेत्–**

ॐ ब्रह्मयज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोव्वेनऽआवः। सबुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः।

ॐ ब्रह्मणे नमः ब्रह्माणमावाहयामि स्थापयामि पूजयामीति पूजयेत्।

**क्षीरे अच्युतम्–**

ॐ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममेरजा ६ सि । योऽअस्कभायदुत्तर ँ सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णवेत्वा । ॐ अच्युताय नमः। अच्युतमावाहयामि स्थापयामि पूजयामीति पूजयेत्।

**दध्निशुक्रम्–**

ॐ अन्नात्परिस्रुतोरसं ब्रह्मणाव्यपिबत्क्षत्रं पयः सोमं प्रजापतिः । ऋतेन सत्यमिन्द्रियं विपान ँ शुक्रमन्धसऽ इन्द्रस्येन्द्रियमिदं पयोमृतम्मधु॥ ॐ शुक्राय नमः शुक्रमावाहयामि स्थापयामि पूजयामीति पूजयेत् ।

**घृते श्रीकृष्णम्–**

ॐ कृष्णोस्याखरेष्ठोऽग्नयेत्वा जुष्टं प्रोक्षामि वेदिरसि बर्हिषेत्वा जुष्टं प्रोक्षामि बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं

प्रोक्षाम्म्यदित्यैव्युन्दनम् । ॐ श्रीकृष्णाय नमः श्रीकृष्णम् आवाहयामि स्थापयामि पूजयामीति पूजयेत्।

कुशोदके सवितारम् -

ॐ पूषन्नेकर्षे यम सूर्यप्राजापत्य व्यूहरश्मीन् समूह तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि योसावसौ पूरुषः सोऽहमस्मि। ॐ सवित्रे नमः सवितारमावाहयामि स्थापयामि पूजयामीति -

सम्पूज्य प्रणम्य एकत्र मेलयित्वा दशवारं गायत्र्या अभिमन्त्र्य प्राशयेत्।

ॐ यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके।

प्राशनात्पञ्चगव्यस्य दहत्वग्निरिवेन्धनम् ॥

## प्रतिज्ञा संकल्पः

हरिः ॐ तत्सत् ३ ॐ विष्णुर्विष्णुर्विष्णुःश्रीमद्भगवतो महापुरुषस्य श्रीभूनीला नायकस्य सौशील्यादि सकलकल्याणगुणगणसमलङ्कृतस्य श्रीमन्नारायणस्य आज्ञया सकलजगत्सृष्टिं कुर्वतोऽखिललोकपितामहस्य ब्रह्मणो द्वितीये परार्द्धे एकपञ्चाशत्तमे वर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसे दिनस्य

द्वितीये यामे तृतीये मुहूर्तेऽष्टमे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरेऽष्टाविंशतितमे कलियुगे कलिप्रथमचरणे श्रीमन्नृपतिविक्रमार्कराज्यात् श्रीरामानुजमुनिप्रादुर्भावाद्वा वर्तमाने अमुक वत्सरे अमुकायने अमुकर्त्तौ अमुकमासे अमुकपक्षे अमुक-तिथौ अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते देवगुरौ

शेषेष्वन्येषुग्रहेषु तत्तत्स्थानस्थितेषु सत्स्वेवं गुणगणविशेषण विशिष्टायां शुभपुण्यतिथौ जम्बूद्वीपे भारतवर्षे अमुकराज्ये अमुकनद्याः समीपे अमुकग्रामे अमुकदेवसन्निधौ वर्तमान अमुकवेदान्तर्गत अमुकशाखाध्यायी अमुकर्षिकोऽमुकगोत्रोत्पन्न अमुकनामाहं (अमुकशर्माहं) भगवदाज्ञया भगवत्कैंकर्यरूपेण भगवन्मुखोल्लासार्थं दीप, कलश विष्वक्सेन समाराधनपूर्वकम्पुण्याहवाचनपुरस्सरं भगवदाराधनं कृत्वा अमुककर्माङ्ग हवनकर्म करिष्ये (करिष्यामि) वा । **ततः प्रायश्चित्तार्थं गोदानं कुर्यात् । हस्ते पुष्प चन्दनाक्षतानादाय प्रार्थनाङ्कुर्यात् ।**

## गोदानविधिः

ॐ अपश्याम युवतीमाचरन्तीं मृताय जीवां परिणीयमानाम् ।
अन्धेन या तमसा प्रावृतासि प्राचीमवाचीमवयन्नरिष्ट्यै ॥

ॐ मयैतामास्तां भ्रियमाणा देवी सती पितृलोकं यदैषि ।
विश्ववारा नभसा संव्यन्त्युभौ नो लोकौ पयसा वृणीहि ।

ॐ रयिष्ठामग्निं मधुमन्तमूर्मिणमूर्जः सन्तं त्वा पयसोप संसदेम । संरय्या समुवर्चसा सचस्वानः स्वस्तये ॥

ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः ।
प्रणुवोचं चिकितुषे जनाय मागामनागामदितिं वधिष्ठ । ॐ ये जीवा ये च मृता ये जाता ये च जन्याः । तेभ्यो घृतस्य धारयितुं मधुधारा व्युदन्ती ।

**इति गोसूक्तं पठित्वा गोरुपरि पुष्पाणि समर्पयेत्—**

ॐ सुं सुरभ्यै नमः इति मन्त्रेण **पुष्पाक्षतगन्धवस्त्रनैवेद्या-दिभिः गां पूजयित्वा आकृष्णेनेति मन्त्रेण ब्राह्मणं पूजयेत्—**

ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतम्मर्त्यञ्च । हिरण्ययेन सविता रथेनादेवो याति भुवनानि पश्यन् ॥ **ततः कर्म पात्रोदकेन गां सम्प्रोक्ष्य संपूजयेत्—**

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।

नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमोनमः ॥

ॐ इरावती धेनुमती हि भूत ँ सूयवसिनी मनवेदशस्या । व्यस्क्कब्भ्ना रोदसी विष्णवे ते दाधर्त्थपृथिवीमभितो मयूखैः स्वाहा ॥

**ततोऽर्घ्यपाद्याचमनीयवस्त्रपुष्पाक्षतधूपदीपैर्गां पूजयित्वाङ्गपूजां कुर्यात्—**

ॐ पृष्ठे ब्रह्मणे नमः । ॐ गले विष्णवे नमः । ॐ मुखे रुद्राय नमः । ॐ मध्ये देवगणेभ्यो नमः । ॐ रोमकूपेषु सर्वेभ्यो महर्षिभ्यो नमः । ॐ पुच्छे सर्वनागेभ्यो नमः । ॐ स्तनेषु चतुस्समुद्रेभ्यो नमः । ॐ खुरेष्वष्टकुलपर्वतेभ्यो नमः । ॐ नेत्रयोः शशिभास्कराभ्यां नमः । ॐ श्रृङ्गयोर्मध्ये सर्वतीर्थेभ्यो नमः । ॐ मूत्रस्थाने गङ्गादि सर्वतीर्थेभ्यो नमः ।ॐ गोमये लक्ष्म्यै नमः । ॐ कर्णयोः अश्विनीकुमाराभ्यां नमः । ॐ जिह्वायां सरस्वत्यै नमः । ॐ नासापुटयोः सुमुखाय नमः । ॐ उदरे पृथिव्यै नमः । ॐ

दक्षिणपार्श्वे कुबेराय नमः । ॐ वामपार्श्वे वरुणाय नमः । ॐ हुङ्कारे सर्वदेवेभ्यो नमः । **इत्यङ्गपूजां विधाय प्रार्थनां कुर्यात् –**

पृष्ठे ब्रह्मा गले विष्णुर्मुखे रुद्राः प्रतिष्ठिताः ।
मध्ये देवगणाः सर्वे रोमकूपे महर्षयः ॥
नागाः पुच्छे खुराग्रेषु ये चाष्टौ कुलपर्वताः ।
मूत्रे गङ्गादयो नद्यो नेत्रयोः शशिभास्करौ ॥
श्रृङ्गयोः सर्वतीर्थानि गोमये कमलालया ।
स्तनेषु सागराः सर्वे जिह्वायां च सरस्वती ॥
कर्णयोरश्विनौ नासापुटयोः सुमुखः स्मृतः ।
दक्षपार्श्वे कुबेरस्तु वामे जलधिनायकः ॥
हुङ्कारे सर्वदेवाश्च धरा चैवोदरे स्थिता ।
एते यस्यास्तनौ देवाः सा धेनुर्वरदास्तु मे ॥
या लक्ष्मीः सर्वभूतानां यत्र देवा व्यवस्थिताः
धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥

**गो पुच्छोदकेन स्वशिरस्यभिषिञ्चेत्–**

ॐ मनो मे तर्पयत व्वाचम्मे तर्पयतप्प्राणम्मे तर्पयत चक्षुर्म्मे तर्प्पयतश्श्रोत्रम्मे तर्पयतात्मानं मे तर्पयतप्प्रजाम्मे तर्पयत पशून्मे तर्पयत गणान्मे तर्पयत गणा मे मा वितृषन् ॥

**ततो हस्ते जलाक्षतानादाय सकल्पं कुर्यात्—**

हरिः३ॐतत्सत्३ओंविष्णुर्विष्णुर्विष्णुःअद्य श्रीमद्भगवतो महापुरुषस्य श्रीविष्णोराज्ञया प्रवर्तमानस्य परार्धद्वयजीविनो ब्रह्मणो द्वितीये परार्ध एकपञ्चाशत्तमे वर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसे दिनस्य द्वितीये यामे तृतीये मुहूर्तेऽष्टमे श्वेतवाराहकल्पे वैवस्वतमन्वन्तरेऽष्टाविंशतितमे कलियुगे कलिप्रथमचरणे श्रीमद्रामानुजमुनिप्रादुर्भावाद् वर्तमानेऽमुक संवत्सरे श्रीमन्नृपतिविक्रमार्कराज्यादमुकायनेऽमुकर्तावमुकमासेऽमुकपक्षेऽमुकतिथावमुकनक्षत्रेऽमुकयोगेऽमुककरणेऽमुकराशिस्थिते श्रीसूर्येऽमुकराशिस्थिते चन्द्रेऽमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथा स्थानस्थितेषु सत्स्वेवं गुणगणविशेषेण विशिष्टायां शुभपुण्यतिथावमुकगोत्रोत्पन्नो अमुकशर्मा/वर्मा/गुप्तो/दासोऽहं भगवदाज्ञया भगवन्मुखोल्लासार्थं करिष्यमाण अमुकर्माङ्ग होमकर्मकर्तुं योग्यतासिद्ध्यर्थं रौप्यखुरां ताम्रपृष्ठां सुर्वणश्रृङ्गां मुक्तापुच्छां कांस्यदोहनीं सुरत्नमालिकां दुकूलादि परिवृतां सोपस्करां रुद्रदैवतां कृच्छ्रचान्द्रायणरूपामिमां गां/गवार्थे परिकल्पितं निष्क्रयद्रव्यं वा अमुकगोत्रा-यामुकप्रवरान्वितायामुकशर्मणे श्रीवैष्णवाय ब्राह्मणाय तुभ्यमहं दातुमुत्सृजे।

**इति जलाक्षतसहितं गोपुच्छं ब्राह्मणकरे दद्यात्।**

ॐ कोदात्त्कतस्माऽअदात्त्कामोदात्त्कामायादात् । कामो दाताकामः प्रतिग्ग्रहीता कामै तत्ते ॥ **ब्राह्मणश्च स्वस्तीत्युक्त्वा**

प्रतिगृह्णीयात् । सुवर्णादि द्रव्यमादाय अद्यकृतैद्गोदानप्रतिष्ठार्थम् हिण्यादिद्रव्यममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं दातुमुत्सृजे।

इति दत्वा प्रार्थयेत्–

ॐ गावो ममैनः प्रणुदन्तु सौर्यास्तथासौम्याः स्वर्गयानाय सन्तु।
आत्मानं मे मातृवच्चाश्रयन्तु तथानुक्ताः सन्तु सत्याशिषो मे ॥

ॐ स्वधा त्वं पितृमुख्यानां स्वाहा यज्ञभुजां यतः।

सर्वपापहरा धेनुः तस्माच्छान्तिं प्रयच्छ मे॥

इति गां ब्राह्मणञ्च प्रदक्षिणीकृत्य अभिवादयेत् विप्रश्च गोपुच्छेन यजमानमभिषिञ्चेत्।

ॐ द्यौः शान्तिरन्तरिक्ष ँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । व्वनस्प्पतयः शान्तिर्व्विश्वेदेवाः शान्तिर्ब्ब्रह्मशान्तिः सर्व ँ शान्तिः शान्तिरेव शान्तिः सामाशान्तिरेधि। इति गोदानप्रयोगः

## अथ भुवःपञ्चसंस्काराः

यस्य द्विरदवक्त्राद्याः पारिषद्याः परःशतम्।

विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये॥

सर्वमङ्गलमाङ्गल्यं सर्वोपद्रवनाशनम्।

वन्दे रामानुजार्यस्य नित्यं पादाम्बुजद्वयम्॥

इत्युच्चार्य्य यज्ञभूमिं शोधयेत्—

ॐ भूरसि भूमिरस्यदितिरसि व्विश्श्वधाया विश्वस्य भुवनस्य धर्त्री। पृथिवीं यच्छपृथिवीं दृ ☉ ह पृथिवीं माहि ☉ सीः॥

मृत्तिकास्थापनम्—

ॐ अश्माचमे मृत्तिकाचमे गिरयश्चमे पर्वताश्चमे सिकताश्चमे व्वनस्पतयश्चमे हिरण्यञ्चमेऽयश्चमे श्यामञ्चमे लोहञ्चमे सीसञ्चमे त्रपुचमे यज्ञेनकल्पन्ताम्।

दर्भान् गृहीत्वा पठेत्—

ॐ एषवस्तोमो मरुतऽइयङ्गीर्मान्दार्यस्य मान्यस्य कारोः। एषो यासीष्टतन्वेवयां विद्यामेषं वृजनञ्जीरदानुम्।

दर्भैः परिसमूहनम्—

ॐ यद्देवा देवहेडनन्देवासश्चकृमावयम् । अग्निर्मा तस्मादेनसो विश्वान् मुञ्चत्व ☉ हसः।

गोमयोदकेन भूमिपरिशोधनम्—

ॐ मानस्तोके तनयेमानऽआयुषि मानो गोषु मानोऽअश्वेषु रीरिषः। मानोव्वीरान्नुद्रभामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे।

भूम्यां श्रुवेणोल्लेखनम्—

ॐ त्वामिद्धिहवामहे सातौवाजस्य कारवः । त्वां वृत्रेष्विन्द्रसत् पतिन्नरस्त्वाङ्काष्ठा सर्वतः।

**शोधितभूमौ निम्नलिखितमन्त्रैः प्रागग्रं श्रुवेण रेखात्रयं कुर्यात्—**

ॐ प्रथमाद्द्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाः सत्येन सत्यँ यज्ञेन यज्ञो यजुर्भिर्यजू ँ षि सामभिः सामान्यृग्भिर्ऋचः पुरोनुवाक्याभिः पुरोनुवाक्यायाज्याभिर्याज्यावषट्कारैर्वषट्काराऽ-आहुतिभिराहुतयो मे कामान्त्समर्द्धयन्तु भूः स्वाहा ॥

ॐ दक्षिणामारोह त्रिष्टुप्त्वावतु बृहत्साम पञ्चदशस्तोमो

ग्रीष्मऽऋतुः क्षेत्रन्द्रविणं प्रतीचीमारोह ॥ ॐ प्रतीचीमारोहजगती त्वावतु वैरूप ँ साम सप्तदशस्तोमो वर्षाऽऋतुर्व्विड्द्रविणमुदीचीमारोह॥ ॐ उदीचीमारोहानुष्टुप्त्वावतु व्वैराज ँ सामैकवि ँ शस्तोमः शरदृतुः फलन्द्रविणमूर्द्धामारोह॥

**अनामिकाङ्गुष्ठाभ्यां मृदस्त्रिरुद्धरणम्—**

ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिं मे धामया सिष ँ स्वाहा ।

**वेद्यां श्रुवेण उद्धतपांशूनामनामिकाङ्गुष्ठाभ्यामुद्धरणम्—**

ॐ व्रतं कृणुताग्निर्ब्रह्माग्निर्यज्ञो वनस्पतिर्यज्ञियः । दैवीं धियं मनामहे सुमृडीकामभिष्टये वर्चोधां यज्ञवाहस ँ सुतीर्थानोऽअसद्वशे । ये देवा मनो जाता मनो युजो दक्षक्रतवस्तेनोवन्तु ते नः पान्तु तेभ्यः स्वाहा ॥ जलेनाभिषेचनम्—

ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ॥ **इति भुवः पञ्चसंस्काराः । कुण्डे रंगवल्लीं विधाय रंगवल्युपरि कुशानाच्छाद्य भद्रसूक्तेन स्वस्तिवाचनं पठेत् ।**

# अथ स्वस्तिवाचनम्

## अथ भद्रसूक्तम्

ॐआनो भद्राः क्रतवो यन्तु व्विश्वतो दब्धासोऽअपरीतासऽउद्भिदः।
देवा नो यथा सदमिद्वृधेऽअसन्नप्प्रायुवो रक्षितारो दिवे दिवे ॥
देवानां भद्रा सुमतिर्ऋजूयतान्देवाना ँ रातिरभिनो निवर्तताम्।

देवाना ६ सख्यमुपसेदिमा वयन्देवानऽआयुः प्रतिरन्तु जीवसे ॥
तान्पूर्वयानिविदाहूमहे व्वयं भगं मित्रमदितिन्दक्षमस्त्रिधम्।

अर्य्यमणं वरुण ँ सोमभश्विना सरस्वती नः सुभगा मयस्करत् ॥

तन्नोव्वातो मयोभुव्वातु भेषजन्तन्माता पृथिवी तत्पिता द्यौः ।
तद्ग्रावाणः सोमसुतो मयो भुवस्तदश्विना श्रृणुतन्धिष्ण्यायुवम् ॥
तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसेहूमयेव्वयम्।

पूषानो यथा वेदसामसद्वृधे रक्षितापायुरदब्धः स्वस्तये ॥

स्वस्तिनऽइन्द्रो वृद्धश्श्रवाः स्वस्तिनः पूषाव्विश्ववेदाः।

स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥

पृषदश्वामरुतः पृश्निमातरः शुभं यावानो विदथेषु जग्मयः।

अग्निर्जिह्वामनवःशूरचक्षसो विश्वेनो देवाऽअवसागमन्निह ॥

भद्रङ्कर्णेभिः श्रृणुयामदेवाभद्रं पश्येमाक्षभिर्यजत्राः।

स्थिरैरङ्गैस्तुष्टुवा ६ सस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥

शतमिन्नु शरदोऽअन्ति देवायत्रानश्चक्रा जरसन्तनूनाम्।

पुत्त्रासो यत्र पितरो भवन्ति मानो मद्ध्यारीरिषतायुर्गन्तोः॥

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता सपिता सपुत्रः।

विश्वेदेवाऽअदितिःपञ्चजनाऽअदितिर्जातमदितिर्जनित्वम्॥

तम्पत्नीभिरनुगच्छेमदेवाः पुत्त्रैर्भ्रातृभिरुत वा हिरण्यैः।

नाकं गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठेऽअधिरोचने दिवः॥

द्यौः शान्तिरन्तरिक्ष ँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्व ँ शान्तिः शान्तिरेव शान्तिः सामाशान्तिरेधि॥

## अथ गौरसर्षपैर्दिग्रक्षणम्

पूर्वे रक्षतु गोविन्द आग्नेय्यां गरुडध्वजः।

याम्यां रक्षतु वाराहो नारसिंहस्तु नैऋृति॥

वारुण्यां केशवो रक्षेद् वायव्यां मधुसूदनः।

उत्तरे श्रीधरो रक्षेदैशान्यां तु गदाधरः॥

ऊर्ध्वङ्गोवर्धनो रक्षेदधस्ताच्च त्रिविक्रमः।

एवं दशदिशो रक्षेद् वासुदेवः सनातनः॥

ॐ रक्षोहणं व्वलगहनं व्वैष्णवीमिदमहन्तं बलगमुत्किरामि यम्मेनिष्ट्योयममात्योनिचखानेदमहन्तं वलगमुत्किरामि यम्मे

समानो यमसमानो निचखानेदमहन्तं वलगमुत्किरामि यम्मे सबन्धुर्यमसबन्धुर्निचखानेदमहन्तं वलगमुत्किरामि यम्मे सजातो यमसजातो निचखानोत्कृत्याङ्किरामि ॥ ॐ स्वराडसि सपत्नहा सत्रराडस्यभिमातिहा जनराडसि रक्षोहा सर्व्वराडस्य मित्रहा ॥ ॐ रक्षोहणो वो वलगहनः प्रोक्षामि वैष्णवान् रक्षोहणो वोव्वलगहनो वनयामि वैष्णवान् रक्षोहणो वो वलगहनोवस्तृणामिव्वैष्णवान् रक्षोहणौवां वलहनाऽउपदधामि वैष्णवी रक्षोहणौ वां वलगहनौ पर्य्यूहामिव्वैष्णवी वैष्णवमसि वैष्णणवास्थ ॥

विनायका विघ्नकरा महोग्रा यज्ञद्विषो ये पिशिताशनाश्च ।

सिद्धार्थकैर्वज्रसमानकल्पैः मया निरस्ताः स्वगृहं प्रयान्तु ॥

## अथदिक्पूजनम्

पूर्वे -

ॐ पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदाभराग्निंपुरीष्यमङ्गिरस्वदच्छेमोग्निं पुरीष्यमङ्गिरस्वद्भरिष्यामः ॥

दक्षिणे -

ॐ अग्निश्च पृथिवी च सन्नते ते मे सन्नमतामदो वायुश्चान्तरिक्षञ्च सन्नते ते मे सन्नमतामदऽआदित्यश्चद्यौश्च सन्नते ते मे सन्नमतामदऽआपश्च वरुणश्च सन्नते ते मे सन्नमतामदः सप्तस ꣳ सदोऽअष्टमी भूतसाधनी । सकामाँ२ऽअध्वनस्कुरु संज्ञानमस्तु मेमुना ॥

पश्चिमे –

ॐ वायो येते सहस्रिणो रथासस्तेभिरागहि। नियुत्वा-न्त्सोमपीतये।

उत्तरे–

ॐ सोमो धेनु ँ सोमोऽअर्वन्तमासु ँ सोमो वीरङ्कर्मण्यन्ददाति। सादन्यं विदत्थ्य गूं सभेयम्पितृश्रवणं यो ददाशदस्मै ॥

आग्नेये–

ॐ अग्निन्दूतं पुरोदधे हव्यवाहमुपब्रुवे। देवाँ२ऽआशादयादिह॥

नैर्ऋत्ये–

ॐ कयानश्चित्रऽआभूवदूती सदावृधःसखा। कयाश चिष्ठया-वृता।

वायव्ये–

ॐ वायुरनिलममृतमथेदम्भस्मान्त ँ शरीरम्।

ॐ क्रतोस्मर ॐ क्लिबेस्मर ॐ कृत ँ स्मर॥

ईशाने –

ॐ ईशावास्यमिद गूँ सर्वं यत्किञ्च जगत्यां जगत्।

तेनत्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्॥

त्रिभिर्मन्त्रैर्मध्ये पूजयेत्–

ॐ सूर्यरश्मिर्हरिकेशः पुरस्तात् सविता ज्योतिरुद याँ२ऽअजस्रम् । तस्य पूषा प्रसवे याति विद्वान्त्संपश्यन् विश्वा भुवनानि गोपाः ॥

ॐ प्रजापतेनत्वदेतान्यन्योविश्वारूपाणि परिता बभूव य्यत्त्कामास्ते जुहुमस्तन्नोऽअस्तुवय ँ स्यामपतयोरयीणाम् ॥

ॐ सदसस्पतिमद्‌भुतं प्रियमिन्द्रस्यकाम्यम् । सनिं मे धामयासिष ६ स्वाहा ॥

## अथभूपूजनम्

ततः तण्डुलचूर्णेन मण्डले ऊर्ध्ववक्त्रामैशान्ये न्यस्तमौलिकां नैर्ऋते न्यस्तपादां भूमिं तालमात्रामालिख्य तत्र तण्डुलोपरि सप्तदर्भैर्निर्मितं कूर्चं निक्षिप्य विनियोग पूर्वकं पीताक्षतैःभूमिमावाह्य पूजयेत्–

ॐ भूरसीत्यस्य प्रजापतिर्ऋषिः प्रस्तारपङ्क्तिश्छन्दः भूमिर्देवता भूमिपूजने विनियोगः ।

ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री । पृथिवीं यच्छपृथिवींन्दृ ँ ह पृथिवींम्माहि ँ सीः ॥

आगच्छ सर्वकल्याणि वसुधे लोकधारिणि ।

पृथिवि ब्रह्मदत्तासि काश्यपेनाभिवन्दिते ॥

भूमिमावाहयाम्यद्य धारिणीं सर्वदेहिनाम् ।

सर्वभूतप्रतिष्ठाञ्च क्षितिं क्षोणीं सरस्वतीम् ॥

एहि मे वसुधे देवि वरदे भूतभाविनि।

सर्वाश्रये महाभागे देववद्भयहारिणि ॥

**भूमौ दण्डवत्प्रणमेत्–**

ॐ उद्धृतासि वराहेण कृष्णेन शतबाहुना। द्रंष्टाग्रैर्लीलया देवि यज्ञार्थं प्रणमाम्यहम् ॥

**ततः भूमौ जानुनीपातयित्वाघ्यङ्गमर्घ्यं दद्यात्–**

ॐ ब्रह्मणा निर्मिते देवि विष्णुना शङ्करेण च।

पार्वत्या चैव गायत्र्या स्कन्द वैश्रवणेन च ॥

यमेन पूजिते देवि धर्मस्य विजिगीषया।

सौभाग्यं देहि पुत्राँश्च धनं रूपं च पूजिता।

पृथिवि देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम् ॥

गृहाणार्घ्यमिमं देवि सर्वकामाँश्च देहि मे ॥

**अथ पञ्चोपचारपूजां कुर्यात्–**

ॐ भूं भूम्यै नमः अर्घ्यं समर्पयामि। ॐ पृं पृथिव्यै नमः पाद्यं समर्पयामि। ॐ अं अचलायै नमः आचमनं समर्पयामि। ॐ सं सर्वधात्र्यै नमः स्नानं समर्पयामि ॐ अं अनन्तायै नमः नैवेद्यं समर्पयामि।

ततः बद्धाञ्जलिःप्रार्थयेत्-

उपचारानिमाँस्तुभ्यं ददामि परमेश्वरि।

भक्त्या गृहाण देवेशि त्वामहं शरणं गतः॥

ततः फललाजदधिसक्तूनां चतुरः पिण्डान् कृत्वा गन्धादिभिः समलङ्कृत्य वंशपात्रे घृतदीपसहितं प्रतिष्ठाप्य—

भो भूदेवि समस्तपरिवारसहिता इमं बलिं गृहाण गृहीत्वा च मम शान्तिकर्त्री पुष्टिकर्त्री वरदा भव॥

इति भूम्यै बलिं प्रदाय पुष्पजलाक्षतानादाय भूमौ निक्षिप्य प्रार्थयेत्—

देशस्वामि पुरस्वामि गृहस्वामि परिग्रहे।

मनुष्यधनहस्त्यश्वपशुवृद्धिकरी भव॥

नमो नमो मेदिनि लोकमातरुर्व्यै महाशैलशिलाधरायै।

नमो नमो धारिणि लोकधात्र्यै जगत्प्रतिष्ठे वसुधे नमोस्तु ते॥

## अथ वराहपूजनम्

ॐ वराह इति मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दः वराहो देवता वराह पूजने विनियोगः।

ॐ वराहवः स्वतपसो विद्युन्महसो धूपयः श्वापयो गृह मेधांश्चेत्येमे ये चेमेऽअशिमि विद्विषः॥

देवमावाहयाम्यद्य नृवराहं महाबलम्।

बालेन्दुतुल्यद्रंष्ट्राग्रलीलोद्धतवसुन्धरम्॥

एहि मे देवदेवेश वराहामितविक्रम ।
निरस्ताशेषदैत्येन्द्र दीनभक्तजनप्रिय ॥

**प्रार्थयेत्—**

द्रंष्ट्राग्रेणोद्धता गौः उदधिपरिवृता पर्वतैर्निम्नगाभिः
साकं मृत्तिपण्डवत्प्राक् बृहदुरुवपुषानन्तरूपेण येन ।
सोऽयं सर्वासुरारिर्मुरनरकदशास्यान्तकृत् सर्वसंस्थः
कृष्णो विष्णुः सुरेशो नुदतु ममरिपूनादिदेवो वराहः ॥

## अथ अनन्तपूजनम्

**तन्मित्रस्येति मन्त्रस्य कुत्सऋषिः त्रिष्टुप्छन्दोऽनन्तो देवता अनन्तपूजने विनियोगः ।**

ॐ तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपङ्कृणुते द्योरुपस्थे। अनन्तमन्यद्रुसदस्य पाजः कृष्णमन्यद्धरितः सम्भरन्ति॥

आवाहयिष्ये वरदमनन्तं दीप्ततेजसम् ।
फणावलिगताशीर्षम् महीमण्डलधारिणम् ॥
एह्यनन्त महाभाग शेषाहे धरणीधर ।
शशाङ्कशतसंकाश नीलाम्बरपरीवृत ॥

**इत्यावाह्यार्घ्याद्युपचारैः संपूज्य बद्धाञ्जलिः प्रार्थयेत्—**

नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुवाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥

# अथकूर्मपूजनम्

कूर्मस्त इति सौचिकोऽग्निर्ऋषिः जगतीछन्दः कूर्मो देवता कूर्मपूजने विनियोगः।

ॐ कूर्मस्तऽआयुरञ्जरं यदग्ने यथा युक्तोजातवेदो नरिष्याः। अथावहासि सुमनस्यमानो भागं देवेभ्यो हविषः सुजातः।

कूर्ममावाहयाम्यद्य धृतमन्दरपर्वतम्।
दुर्निरीक्ष्यातिगम्भीरमहासलिलगोचरम्॥
एहिकूर्म महाभाग सुधोत्पत्तिकराच्युत।
मन्दराचलसंघर्षक्षणकण्डूयनोत्सव॥

इत्यावाह्याघ्र्यादिभिः संपूज्य प्रार्थयेत्—

तुभ्यं नमस्क्रियां कुर्मः कूर्मरूपाय वेधसे।
अमराद्रिं धारयते विबुधानन्ददायिने॥

दिव्यामृतार्थं मथिते महाब्धौ देवासुरैर्वासुकिमन्दराभ्याम्।
मज्जन्तमब्धौ धृतमद्रिमङ्गे तं कूर्मरूपं प्रणमामि भक्त्या॥

इति संपूज्य प्रणम्य पूर्वे दीपं प्रज्वाल्य पूजयेत्—

# अथ दीपपूजनम्

ॐ पृष्टोदिवि पृष्टोऽअग्निः पृथिव्यां पृष्टो विश्वाऽओषधीराविवेश। वैश्वानरः सहसापृष्टोऽअग्निः सनो दिवासरिषस्पातु नक्तम्।

ॐ स्थिरोभव वीड्वङ्गऽआशुर्भववाज्यर्वन् । पृथुर्ब्भव सुखदस्त्वमग्नेः पुरीषवाहणः ॥ ॐ कर्मसाक्षिणे दीपनारायणाय नमः आवाहयामि स्थापयामि पूजयामि ।

**इति आवाह्य अर्घ्यादि-सर्वोपचारैः संपूज्य प्रार्थयेत्—**

नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।

सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥

## ॥ प्रधानकलशपूजनम् ॥[1]

**ईशाने सुवर्णादि निर्मितौ द्वौ घटौ समलङ्कृत्य संस्थाप्य घटाधारां भूमिं प्रार्थयेत्—**

ॐ भूमिर्भूम्ना द्यौर्व्वरिणान्तरिक्षं महीत्वा ।

उपस्थेते देव्यदितेग्निमन्नादमन्नाद्याया दधे ॥

**धान्यास्तरणम्—**

ॐ धानावन्तङ्करम्भिणमपूपवन्तमुक्थिनम् । इन्द्र प्रातर्जुषस्वनः ।

**कलश स्थापनम्—**

ॐ कुम्भोवनिष्टुर्जनिता शचीभिर्यस्म्मिन्नग्रेयोन्याङ्गर्भोऽअन्तः

प्लाशिर्व्यक्तशतधारऽउत्सो दुहेनकुम्भी स्वधाम्पितृभ्यः ।

---

१ स्वर्णं वा रजतं वापि ताम्रमृण्मयमेव वा
अकालमव्रणं चैव सर्वलक्षणसंयुतम् ॥
पञ्चाशाङ्गुलवैपुल्यमुत्सेधः षोडशाङ्गुलः ।
द्वादशाङ्गुलकम्मूलम्मुखमष्टाङ्गुलन्तथा ॥

कलशेजलपूरणम्-

ॐ अपो देवीरुपह्वये यत्र गावः पिबन्ति नः । सिन्धुभ्य कर्त्वं गूँ हविः ।

कलशदृढीकरणम्-

ॐ स्थिरोभव वीड्वङ्गऽआशुर्भव वाज्यर्वन् ।

पृथुर्भवसुखदस्त्वमग्नेः पुरीषवाहणः ॥

पल्लवनिक्षेपः-

ॐ अश्वत्थे वो निषदनं पर्णेवो वसतिष्कृता ।

गोभाजऽइत्किलासथ यत्सनवथ पूरुषम् ॥

कुशकूर्चनिक्षेपः-

ॐ पवित्रन्ते विततं ब्रह्मणस्पते

प्रभुर्गात्राणि पर्येषि विश्वतः ।

अतप्ततनु र्न तदामोऽश्नुते श्रृतासऽइद्वहन्तस्तत्समासते ॥

दूर्वानिक्षेपः-

ॐ सहस्रपरमा देवी शतमूला शताङ्कुरा ।

सर्वं हरतु मे पापं दूर्वा दुःस्वप्ननाशिनी ॥

फलनिक्षेपः-

ॐ याः फलिनीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः ।

बृहस्पति प्रसूतास्ता नो मुञ्चत्व गूँ हसः ॥

सर्वौषधी निक्षेपः-

ॐ याऽओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा।

मनैनु बभ्रूणामह गूँ शतन्धामानि सप्त च ॥

पञ्चरत्न निक्षेपः

ॐ परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत्।

दधद्रत्नानि दाशुषे ॥

गन्धनिक्षेपः-

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टाङ्करीषिणीम्।

ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

सप्त मृत्तिकानिक्षेपः—

ॐ मृत्तिके प्रतिष्ठितं सर्वं तन्मे निर्णुद मृत्तिके।

त्वया हतेन पापेन गच्छामि परमां गतिम्।

पूर्णपात्रम् :—

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

श्रीफलस्थापनम्—

ॐ आदित्यवर्णे तपसोऽधिजातो

वनस्पतिस्तव वृक्षोऽथ बिल्वः।

तस्य फलानि तपसा नुदन्तु

मायान्तरायाश्च बाह्याऽअलक्ष्मीः ॥

वस्त्रवेष्टनम्—

ॐ सुजातो ज्योतिषा सह शर्मवरूथमासदत्स्वः ।
वासोऽअग्नेविश्वरूप गूँ संव्ययस्व विभावसो ॥

ततः प्रधान कलशस्य चतुर्दिक्षु चतुरोवेदानावाह्यपूजयेत्—

पूर्वे ऋग्वेदम्—

ॐ पूर्वे ऋग्वेदाय नमः ऋग्वेदं आवाहयामि स्थापयामि पूजयामि

ॐ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्।

दक्षिणे यजुर्वेदम्—

ॐ यजुर्वेदाय नमः यजुर्वेदमावाहयामि स्थापयामि पूजयामि ।

ॐ इषेत्वोर्जेत्वा वायवस्थ देवोवः सविता प्रार्प्पयतु
श्श्रेष्ठतमायकर्मणऽआप्यायद्ध्वमघ्न्याऽइन्द्राय
भागम्प्रजावती रनमीवाऽअयक्ष्मामा वस्तेनऽईशतमाघस गूँ
सोदध्रुवाऽअस्मिन्गोपतौस्यातबह्वीर्य्यजमानस्य—पशून्पाहि ।

पश्चिमे सामवेदम्—

ॐ सामवेदाय नमः सामवेदमावाहयामि स्थापयामि पूजयामि ।

ॐ अग्नऽआयाहि वीतये गृणानो हव्यदातये। निहोता सत्सिबर्हिषि॥

उत्तरे अथर्ववेदम्—

ॐ अथर्ववेदाय नमः अथर्ववेदमावाहयामि स्थापयामि पूजयामि ॥

ॐ शन्नो देवीरभिष्टयऽआपो भवन्तुपीतये। शंयोरभिस्रवन्तुनः ।

चतुर्भ्योवेदेभ्यो नमःसर्वोपचारान् समर्पयामि ।

कलश प्रतिष्ठा–

ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ गूँ समिमन्दधातु । विश्वेदेवासऽइह मादयन्तामो३म्प्रतिष्ठ । एष वै प्रतिष्ठानाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव प्रतिष्ठितं भवति ॥

इति पीताक्षतैः कलश प्रतिष्ठां कुर्यात्–

**कलश प्रार्थना**

देवदानवसंबाधे मथ्यमाने महोदधौ ।
उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥
त्वत्तोये सर्वतीर्थानि देवा सर्वे त्वयि स्थिताः ।
आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥
सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ।

तत एकस्मिन्कलशे पीताक्षतैर्वरुणमावाह्य पूजयेत्–

## अथ विष्वक्सेनपूजनम्

**पुनरर्घ्यादिकं संपाद्य, कर्ता आचम्य प्राणानायाम्य, पुटकादौ तण्डुलानि निधाय आग्नेय-दिशि कलशं संस्थाप्य, पूर्णपात्रोपरि सप्तदर्भनिर्मिते कूर्चे विष्वक्सेनं पीताक्षतैरावाह्य पूजयेत्, दक्षिणाताम्बूलादिकमादाय संकल्पयेत् ।**

विश्वकर्मन्नितिसूक्तस्य शाकऋषिर्विश्वकर्माविष्वक्सेनो देवता त्रिष्टुप्छन्दः विश्वक्सेनपूजने विनियोगः ।

सर्वमंगलमांगल्यं सर्वोपद्रवनाशनम् ।
वन्दे रामानुजार्यस्य नित्यं पादाम्बुजद्वयम् ॥
लक्ष्मी नाथेत्यादि च श्लोकमनुसंदध्यात् ।
आवाहयामि सेनेशं सर्वविघ्नविनाशकम् ॥
सूत्रवत्या समेतञ्च ब्रह्माण्डपरिपालकम् ॥
आवाहयामि सेनेशं शंखचक्रगदाधरम् ॥
अतसीपुष्पसंकाशं पीतवाससमच्युतम् ॥
एहि मे देवदेवेश भक्तरक्षणतत्पर ॥
गजाननादिसहितः सूत्रवत्या सह प्रभो ॥

**सूत्रवतीसहितं श्रीमन्तं विष्वक्सेनमावाहयामि स्थापयामि पूजयामि। आसनं समर्पयामि ।**

ॐ सूत्रवतीसहिताय श्रीमते विश्वक्सेनाय नमः ।

**हस्तयोरर्घ्यं समर्पयामि पादयोःपाद्यं, मुखे, आचमनीयं, सर्वाङ्गे स्नानं, वस्त्रं, उपवीतं, गन्धं, पुष्पं, धूपं, दीपं, नैवेद्यं, सफलताम्बूलं, दक्षिणां, प्रदक्षिणां, नमस्कारं समर्पयामि, इति संपूज्य प्रार्थयेत् ।**

ॐ विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व पृथिवीमुतद्याम् ।
मुह्यन्त्वन्येऽअभितः सपत्नाऽ-इहास्माकं मघवा सूरिरस्तु ॥
विष्वक्सेन नमस्तेऽस्तु सर्वेषां च शुभप्रद ।
पुष्पाञ्जलिर्मया दत्तो गृहाण गणनायक ॥
ॐ विष्वक्सेनाय विद्महे वेत्रहस्ताय धीमहि । तन्नः सेनेशः प्रचोदयात् ॥

**ततो विश्वक्सेनस्याष्टदिक्षु तत्पार्षदानावाह्यपूजयेत्–**

**ईशाने** ॐ गं गजानाय नमः गजाननमावाहयामि स्थापयामि पूजयामि ।

**आग्नेये** ॐ जं जयत्सेनाय नमः जयत्सेनमावाहयामि स्थापयामि पूजयामि ।

**नैर्ऋत्ये** ॐ हं हरिमुखाय नमः हरिमुखमावाहयामि स्थापयामि पूजयामि ।

**वायव्ये** ॐ कं कालप्रकृतये नमः कालप्रकृतिमावाहयामि स्थापयामि पूजयामि ।

**पूर्वे** ॐ बं बलाय नमः बलमावाहयामि स्थापयामि पूजयामि ।

**दक्षिणस्यां** ॐ प्रं प्रबलाय नमः प्रबलमावाहयामि स्थापयामि पूजयामि ।

**पश्चिमायां** ॐ विं विनायकायनमः विनायकमावाहयामि स्थापयामि पूजयामि ।

**उत्तरे** ॐ विं विघ्नेशाय नमः विघ्नेशमावाहयामि स्थापयामि पूजयामि ।

**इत्यावाह्य अर्घ्याद्युपचारैः संपूज्य तत अञ्जलिं बध्वा प्रार्थयेत्–**

ॐ विघातं विघ्नानां विदधति गजास्यप्रभृतयः ।
सदस्या गीर्वाणप्रवरप्रणुता यस्य सततम् ॥
रमाभर्तुस्सेवा प्रणयनपरो यश्च नितरां ।
स विष्वक्सेनो मे वितरतु मनोवाञ्छितमदः ॥

ॐ यस्य द्विरदवक्त्राद्याः शासने स्थिरवृत्तयः ।
स मे वैकुण्ठसेनानीर्भूयात्सर्वत्र विघ्नहा ॥

**इति सपरिवारं सशक्तिकं विष्वक्सेनं संपूज्य सर्वान् प्रणम्य वरुण पूजनम् कुर्यात्–**

## वरुणपूजनम्

ॐ इमं मे वरुण श्रुधीहवमद्या च मृडय । त्वामवस्युराचके ॥
ॐ तत्वायामि ब्रह्मणावन्दमानास्तदासास्ते यजमानो हविर्भिः।
अहेडमानो वरुणेहवोध्युरुष गूँ समानऽआयुः प्रमोषीः ।
ॐ वरुणाय नमः साङ्ग सपरिवारं सशक्तिकं वरुणमावाहयामि स्थापयामि पूजयामि ।

**इत्यावाह्य सर्वोपचारैः संपूज्य प्रणम्य प्रार्थयेत्–**

त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ।
सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ॥
नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय ।
सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते ॥

## अथ ब्राह्मणवरणम्

**पूगीफलवस्त्रद्रव्याभरणादिकमादाय सोर्ध्वपुण्ड्रः सन्पूर्वाभिमुखो भूत्वा प्रत्यङ्मुखान्ब्राह्मणान् सोर्ध्वपुण्ड्रानुपवेश्य वरणं कुर्यात्–**

हरिः ३ ॐ तत्सत् ३ ॐविष्णुर्विष्णुर्विष्णुरद्य श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य परार्धद्वयजीविनो ब्रह्मणो द्वितीये परार्धे एकपञ्चाशत्तमेवर्षे

प्रथममासे प्रथमपक्षे प्रथमदिवसे दिनस्य द्वितीयेयामे तृतीये मुहूर्तेऽष्टमे श्वेतवाराहकल्पे वैवस्वत मन्वन्तरेऽष्टाविंशतितमे कलियुगे कलिप्रथमचरणे श्रीमद्रामानुजमुनिप्रादुर्भावात् श्रीमन्नृपतिविक्रमार्कराज्याद्वा वर्तमानेऽमुकसंख्याकेऽ-मुकनामसंवत्सरे अमुकायनेऽमुकर्तावमुकमासेऽमुक पक्षेऽमुकतिथावमुकनक्षत्रेऽमुकयोगेऽमुककरणेऽमुकराशिस्थिते श्रीसूर्येऽमुकराशिस्थिते चन्द्रेऽमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथा यथास्थानस्थितेषु सत्स्वेवंगुणगणविशेषेणविशिष्टायां शुभपुण्यतिथावमुकगोत्रोत्पन्नोऽमुकशर्मा/वर्मा/गुप्तो/ दासोऽहं भगवदाज्ञया भगवन्मुखोल्लासार्थं क्रियमाण अमुककर्माङ्ग होमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मकर्तुम् अमुकामुकगोत्रानमुकामुकशर्मणो ब्राह्मणानेभिर्द्रव्यैः तत्तत्कर्मकरणार्थमहं वृणे। ब्राह्मणाश्च वृतास्मः इति ब्रूयुः।

# अथ पुण्याहवाचनम्

**आग्नेयकोणे एकं कलशं[२] पुण्याहवाचनार्थे समलङ्कृत्य संस्थाप्य चतुरो ब्राह्मणान् दर्भहस्तान् पुरत उपवेश्यार्चयेत्—**

**यजमानः** पुष्पाणि पान्तु **विप्राः** सौमनस्यमस्तु। **यजमानः** अक्षतापान्तु **विप्राः** अरिष्टमक्षतं चास्तु। **यजमानः** गन्धाःपान्तु **विप्राः** सौमङ्गल्यमस्तु। **यजमानः** सफलताम्बूलं पातु **विप्राः** ऐश्वर्यमस्तु।

२ हेमादिसंभवंकुम्भं मन्त्राद्भिः क्षालितान्तरम्।
चन्दनागरुकर्पूरधूपितं शोभनाकृतिम्॥
आवेष्टिताङ्गं नीरन्ध्रं तन्तुना त्रिगुणात्मना।
अर्चितं गन्धपुष्पाद्यैः कूर्चासनसमन्वितम्॥
नारिकेलयुतं पञ्चपल्लवैः समलङ्कृतम्।
नवरत्नोदकं मन्त्री स्थापयेत्तारमुच्चरन्॥

यजमानः दक्षिणाः पान्तु विप्राः बहुदेयञ्चास्तु। यजमानः भवद्भिर नुज्ञातः पुण्याहं वाचयिष्ये। विप्राः वाच्यताम् ।

ततो हस्ते हिरण्याक्षतोदकमादाय पूर्वोक्त प्रकारेण देशकालादीन् संकीर्त्य भगवदाज्ञया भगवत्प्रीत्यर्थम् यागोपकरणगृहशरीरा-दिशुद्ध्यर्थम्पुण्याहवाचनमहङ्करिष्यामि।

**इति सङ्कल्प्य जानुनी भूमौ निपात्याञ्जलिं बद्ध्वा प्रार्थयेत्—**

व्रतजपतपः स्वाध्यायक्रतुदयादानदमनियमसम्पन्नानां तत्र भवताम् ब्राह्मणानाम् मनः समाधीयताम् । विप्राः समाहितमनसः स्म। यजमानः प्रसीदन्तु भवन्तः। विप्राः प्रसन्नास्स्मः। यजमानः भवद्भिरनुज्ञातः पुण्याहं वाचयिष्ये । विप्राः वाच्यताम्।

**तत उदककुम्भं सव्यहस्ते निधाय दक्षिणहस्तेन पिधाय प्रार्थयेत्—**

यजमानः भोः ब्राह्मणा अस्य ममामुककर्मणः पुण्याहं भवन्तो ब्रुवन्तु । विप्राः ॐ पुण्याहमस्तु ३ । ॐ पुनस्त्वादित्या रुद्रा वसवः समिन्धताम्पुनर्ब्रह्माणो वसुनीत यज्ञैः । घृतेन त्त्वं तन्त्वं वर्धयस्वसत्याः सन्तुयजमानस्य कामाः॥ यजमानः- भो ब्राह्मणा अस्य ममामुककर्मणः स्वस्ति भवन्तो ब्रुवन्तु, विप्राः- ॐ स्वस्तिरस्तु ३

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः। स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ।

यजमानः- भो ब्राह्मणा अस्य ममामुककर्मणः ऋद्धिं भवन्तो ब्रुवन्तु, विप्राः- ॐ ऋद्धिरस्तु ३

ॐ ऋद्ध्यामस्तोमं सनुयामवाजमानो मन्त्रं सरथे होपयाताम् । यशोनपक्वं मधुगोष्वन्तरा भूतांशोऽअश्विनो कामप्राः ॥ ततः सर्वे ब्रूयुः ॐ शान्तिरस्तु । ॐ पुष्टिरस्तु । ॐ तुष्टिरस्तु । ॐ ऋद्धिरस्तु । ॐ अविघ्नमस्तु । ॐ आयुष्यमस्तु ॐ । आरोग्यमस्तु । ॐ धनधान्यसमृद्धिरस्तु । ॐ गोब्राह्मणेभ्यः शुभमस्तु । ॐ सर्वं शोभनमस्तु ।ॐ सर्वा : सम्पदःसन्तु । ॐ शुभानि वर्धन्ताम् ।ॐ शान्तिः ३ ।

**ततः कुशहस्तैश्चतुर्भिर्विप्रैः सह पुण्याहकलशमभिमन्त्रयेत् । प्रथमं वरुणसूक्तपवमानसूक्ताभ्यामभिमन्त्र्य पाञ्चरात्रागममन्त्रैरभिमन्त्रयेत्—**

## वरुणसूक्तम्

ॐ हिरण्यवर्णाःशुचयःपावका यासुजातः सवितायास्वग्निः।
याऽअग्निं गर्भन्दधिरेसुवर्णास्तानऽआपःश ँ स्योना भवन्तु ॥

ॐ यासा ँ राजावरुणोयातिमध्ये सत्यानृतेऽअवपश्यञ्जनानाम् ।
याऽअग्निं गर्भन्दधिरे सुवर्णास्तानऽआपःश ँ स्योना भवन्तु ॥

ॐ यासान्देवादिवि कृण्वन्ति भक्षं याऽअन्तरिक्षे बहुधा भवन्ति ।
या अग्निं गर्भन्दधिरे सुवर्णास्तानऽआपः श ँ स्योना भवन्तु ॥

ॐ शिवेन मा चक्षुषा पश्यतापः शिवयातन्वोपस्पृशत त्वचम्मे ।
घृतश्च्युतः शुचयो याः पावकास्तान आपः श ँ स्योना भवन्तु ॥

ॐ आपोहिष्ठामयोभुवस्तानऽउर्ज्जे दधातन। महेरणायचक्षसे॥

ॐ योवः शिवतमोरसस्तस्यभाजयतेहनः। उशतीरिवमातरः॥

ॐ तस्माऽअरङ्गमामवोयस्यक्षयाजिन्वथ। आपोजनयथाचनः॥

ॐ चित्पतिर्म्मा पुनातु वाक्पतिर्मापुनातु देवो मां सवित पुनात्वच्छिद्रेण पवित्रेणसूर्यस्यरश्मिभिः । तस्यते पवित्रपते पवित्रपूतस्य यत्कामः पुनेतच्छकेयम्॥

ततःपवमानसूक्तेनाभिमन्त्रयेत्—

## पवमानसूक्तम्

ॐ पवमानस्सुवर्चनःपवित्रेण विचर्षणिः। यः पोता स पुनातु माम्॥ पुनन्तुमांदेवजनाःपुनन्तुवसवोधिया।विश्वेदेवाःपुनीत मा जातवेदः पुनीहि माम्॥ पावमानीः स्वस्त्ययनीः सुदुघाहि घृतश्च्युतः। ऋषिभिः सम्भृतो रसो ब्राह्मणेष्वमृतꣳहितम्॥

पावमानीर्दिशन्तुनऽइमं लोकमथोऽअमुम्।

कामान्समर्धयन्तु नो देवीर्देवैः समाहिता॥

येन देवाः पवित्रेण आत्मानं पुनते सदा।

तेन सहस्रधारेण पावमान्यः पुनन्तु माम्॥

प्राजापत्यं पवित्र ꣳ शतोद्याम ꣳ हिरण्मयम्।

तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनीमहे॥

इन्द्रः पुनीतिः सहमा पुनातु सोमः स्वस्त्या वरुणः समीच्या।
यमो राजा प्रमृणाभिः पुनातु मा जातवेदामोर्जयन्त्या पुनातु।
यन्मे गर्भे वसतः पापमुग्रं यज्जायमानस्य च किञ्चिदन्यत्।
जातस्य यश्चापि च वर्धतो मे तत्पावमानीभिरहं पुनामि॥
ब्रह्मवधात् सुरापानात् स्वर्णस्तेयाद् वृषलीमैथुनसङ्गमात्।
गुरोर्दाराधिगमाच्च तत्पावमानीभिरहं पुनामि॥
दुर्यष्टं दुरधीतं पापं यच्चाज्ञानकृता कृतम्।
अयाजिताश्चासंयाज्यास्तत्पावमानीभिरहं पुनामि॥
पावमानीः स्वस्त्ययनीर्याभिर्गच्छन्ति नान्दनम्।
पुण्यांश्च भक्ष्यान्भक्षयत्यमृतत्वञ्च गच्छति॥
पावमानीः पितृन्देवान्ध्यायेद्यश्च सरस्वतीम्।
पितृंस्तस्योपवर्तेत क्षीरं सर्पिर्मधूदकम्॥
पावमानं परं ब्रह्म शुक्रञ्ज्योतिः सनातनम्।
ऋषींस्तस्योपतिष्ठेत क्षीरं सर्पिर्मधूदकम्॥
पावमानं परं ब्रह्म ये पठन्ति मनीषिणः।
सप्तजन्म भवेद्विप्रो धनाढ्यो वेदपारगः॥

पाञ्चरात्रागममन्त्रैरभिमन्त्रयेत्—

## पाञ्चरात्रागममन्त्राः

दर्भैः स्पृशन्तु कलशं ब्राह्मणैः सह देशिकः।
ततश्च शुद्धिमन्त्राँस्तु पठेदेवं समाहितः ॥१ ॥
ॐ शुद्धयेऽस्तु परो देवो वासुदेवोऽस्तु शुद्धये।
सङ्कर्षणः शुद्धयेऽस्तु प्रद्युम्नश्चास्तु शुद्धये ॥२ ॥
शुद्धयेऽस्त्वनिरुद्धोऽपि केशवश्चास्तु शुद्धये।
नारायणोऽस्तु विश्वेशश्शुद्धये सर्वकर्मणाम् ॥३ ॥
शुद्धये माधवश्चास्तु सर्वलोकहिते रतः।
गोविन्दः शुद्धयेचास्तु परमात्मा सनातनः ॥४ ॥
शुद्धये विष्णुरस्त्वद्य शुद्धये मधुसूदनः।
सर्वलोकहितो देवः शुद्धयेऽस्तु त्रिविक्रमः ॥५ ॥
वामनः शुद्धयेचास्तु श्रीधरोऽद्यास्तु शुद्धये।
शुद्धयेऽस्तु हृषीकेशः पद्मनाभोऽस्तु शुद्धये ॥६ ॥
सदा दामोदरो देवः शुद्धयेऽस्तु जगत्पतिः।
शुद्धये पद्मनाभोऽस्तु शुद्धयेऽस्तु सदा ध्रुवः ॥६ ॥
अनन्तः शुद्धये चास्तु शक्त्यात्मा चास्तु शुद्धये।
सर्वकर्मसु चैवास्तु शुद्धये मधुसूदनः ॥७ ॥

सदा विद्याधिदेवोऽस्तु शुद्धये कपिलस्तथा।
शुद्धये विश्वरूपोऽस्तु शुद्धयेऽस्तु विहङ्गमः ॥८॥
क्रोडात्मा शुद्धयेश्चास्तु शुद्धये बडवाननः।
शुद्धयेऽस्तु सदा धर्मश्चास्तु वागीश्वरस्तथा ॥९॥
देव एकार्णवशयः शुद्धयेऽस्तु निरन्तरम्।
शुद्धयेऽस्तु सदा देवः कूर्मः पातालधारकः ॥१०॥
वाराहः शुद्धयेचास्तु नारसिंहोऽस्तु शुद्धये।
अमृताहरणश्चास्तु शुद्धये सर्वकर्मणाम् ॥११॥
श्रीपतिः शुद्धये चास्तु शान्तात्मा चास्तु शुद्धये।
शुद्धये राहुजिच्चास्तु कालनेमिघ्न एव च ॥१२॥
पारिजातहरश्चास्तु वामनश्चास्तु शुद्धये।
सर्वत्र शुद्धयेचास्तु दत्तात्रेयो महाप्रभुः ॥१३॥
न्यग्रोधशायी भगवान् शुद्धये चास्तु सर्वदा।
एकश्रृङ्गतनुश्चास्तु वामनश्चास्तु शुद्धये ॥१४॥
त्रिविक्रमः शुद्धयेऽस्तु शुद्धयेऽस्तु नरस्सदा।
नारायणः शुद्धयेऽस्तु हरिःकृष्णश्च शुद्धये ॥१५॥
ज्वलत्परशुधृग्रामः शुद्धयेऽस्तु धनुर्धरः।
रामश्च शुद्धये चास्तु वेदविद्भगवाँस्तथा ॥१६॥

शुद्धयेऽस्तु सदा कल्की सर्वदोषक्षयङ्करः ।
शुद्धयेऽस्तु सदा देवः पातालशयनः प्रभुः ॥१७ ॥
शुद्धये सन्तु सर्वेषां सर्वे सर्वत्र सर्वदा ।
एते सर्वे सदा देवाः शान्तये सन्तु पूजिताः ॥१८ ॥
ऋद्धये पुष्टये सन्तु सिद्धये भक्तयेऽपि च ।
शिवाय मुक्तये सन्तु वृद्धये सर्वकर्मणाम् ॥१९ ॥
मन्त्राणां देशिकानाञ्च स्थानानामपि सर्वदा ।
पुत्रमित्रकलत्राणां दासीदासगवामपि ॥
वेदशास्त्रागमादीनां व्रतानामिष्टसम्पदाम् ।
मनोरथानां सर्वेषां हितानां सन्तु सर्वदा ॥२१ ॥
आयुरारोग्यमेधानां धनधान्यादिसम्पदाम् ।
पुण्यानामणिमादीनां गुणानां श्रेयसामपि ॥ २२ ॥
राज्ञो जनपदस्यापि यजमानस्य मन्त्रिणाम् ।
वैष्णवानां विशेषेण परत्र हितमिच्छताम् ॥२३ ॥
पञ्चकालविशुद्धानां सत्वस्थानां शुभात्मनाम् ।
स्वस्त्यस्तु च शिवञ्चास्तु शुभञ्चास्तु पुनः पुनः ॥२४ ॥
अविघ्नमनिशञ्चास्तु दीर्घमायुष्यमस्तु वै ।
समाहितम्मनश्चास्तु सम्पदश्चोत्तरोत्तरम् ॥२५ ॥
पुण्याहं शुद्धयेचास्तु वासुदेवादि मूर्तयः ।

शङ्खचक्रगदापद्मयुक्तः सर्वेश्वरेश्वरः॥२६॥

प्रीयतां भगवान्देवो लाङ्गली प्रीयतां सदा।

प्रद्युम्नः प्रीयतां नित्यमनिरुद्धः सुरेश्वरः॥२७॥

नारायणः सुरेशोऽपि कर्मणां पूरणाय च।

न्यूनाधिकानां शान्त्यर्थम् प्रीयतां प्रीयतां विभुः॥

पुण्याहं स्वस्ति ऋद्धिञ्च संवाच्य सहितो द्विजैः।

आत्मानं प्रोक्षयेत् पश्चाद्यागोपकरणानि च॥

येन देवा पवित्रेणेत्यादि मन्त्रान्पठन्गुरुः।

एवं सर्वेषु यागेषु कुर्यात्पुण्याहवाचनम्॥

**इति पुण्याहं वाचयित्वातज्जलेनाम्रपल्लवयुक्तेन कुशकूर्चेनात्मानं यागोपकरणानि गृहादिकञ्च घण्टावादनपूर्वकं वक्ष्यमाणमन्त्रेण प्रोक्षयित्वा वास्तुसूक्तेन प्रोक्षयेत्—**

ॐ येन देवाः पवित्रेण आत्मानं पुनते सदा।

तेन सहस्रधारेण पावमान्यः पुनन्तु माम्।

# अथ वास्तुसूक्तम्

ॐ वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशोऽअनमीवो भवानः।
यत्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे।

ॐ वास्तोष्पते प्रतरणोनऽएधि गयस्फानो गोभिरश्वेभिरिन्दो।
अजरासस्ते सख्येस्याम पितेव पुत्रान्प्रतितन्नो जुषस्व॥

ॐ वास्तोष्पते शग्मया संसदाते सक्षीमहिरण्मयागातुमत्या। पाहि क्षेमऽउतयोगेवरन्नो यूयं पात स्वस्तिभिः सदानः ॥

ॐ अमीवहावास्तोष्पते विश्वारूपाण्याविशन् । सखा सुसेवऽएधिनः शन्नो भव द्विपदे शञ्चतुष्पदे।

**इति मन्त्रैः सर्वतः प्रोक्षयित्वा ब्राह्मणानभ्यर्च्य वेदादिपारायणे नियुञ्जीत।**

## रक्षाकङ्कणपूजनम्

**त्रिगुणीकृतंसुवर्णादिनिर्मितंरक्षाकङ्कणंदूर्वासर्षपचन्दनादिसहितं पुटकादौ निधाय तत्पुटकं पूर्णकुम्भसमीपं निधाय पात्रं पुटकं वा स्पृशन् नारायणकवचं पठेत्।**

पूर्वे रक्षतु गोविन्द आग्नेय्यां धरणीधरः ।
याम्यां रक्षतु वाराहो नारसिंहस्तु नैर्ऋते ॥
वारुण्यां केशवो रक्षेद्वायव्यां मधुसूदनः ।
उत्तरे श्रीधरो रक्षेदैशान्यां तु गदाधरः ॥
ऊर्ध्वङ्गोवर्धनो रक्षेदधस्तात्तु त्रिविक्रमः ।
एवं दशदिशो रक्षेद्वासुदेवो जनार्दनः ॥
यज्ञाग्रं रक्षताच्छङ्खः पृष्ठे वै पद्ममुत्तमम् ॥
वामपार्श्वे गदा रक्षेद्दक्षिणे तु सुदर्शनः ।
उपेन्द्रः पातु ब्रह्माणमाचार्यम्पातु वामनः ।
ऋग्वेदमच्युतो रक्षेद्यजुर्वेदमथोत्तमः ॥

कृष्णो रक्षतु सामानमथर्वाणञ्च माधवः ।

उपविष्टाँश्च यान्विप्रान् तांश्च रुद्रोऽभिरक्षतु ॥

यजमानं सपत्नीकं पुण्डरीकाक्ष रक्षतु ।

रक्षाहीनं च यत्स्थानं तत्सर्वं रक्षताद्धरिः ॥

**ततो वक्ष्यमाणमन्त्रैः पूजयेत्—**

ॐ रक्षोहणं व्वलगहनंवैष्णवीमिदमहन्तं वलगमुत्किरामि, यम्मेनिष्ट्यो यममात्यो निचखानेदमहन्तं व्वलगमुत्किरामि, यम्मे समानो यमसमानो निचखानेदमहन्तं व्वलगमुत्किरामि, यम्मे सबन्धुर्यमसव्वन्धुर्न्निचखानेदमहन्तं व्वलगमुत्किरामि यम्मेसजातो यमसजातो निचखानोत्कृत्याङ्किरामि ॥

ॐ स्वराडसिसपत्नहा सत्रराडस्यभिमातिहा जनराडसि रक्षोहा सर्व्वराडस्यमित्रहा ॥

ॐ रक्षोहणो वो व्वलगहनः प्प्रोक्षामि व्वैष्णवान्रक्षोहणोवोव्वलगहनो वनयामि व्वैष्णवान् रक्षोहणो वो व्वलगहनोव्वस्तृणामिव्वैष्णवान्रक्षोहणौवांव्वलगहनाऽउपदधामि व्वैष्णवी रक्षोहणौ वां व्वलगहनौ पर्य्यूहामि व्वैष्णवी व्वैष्णवमसि व्वैष्णवास्स्थ ।

ॐ सप्तऋषयः प्रतिहिताः शरीरे सप्तरक्षन्ति सदमप्रमादम्। सप्तापः स्वपतो लोकमीयुस्तत्र जागृतोऽअस्वप्नजौ सत्रसदौ च देवौ ॥

**इति पूजनं कृत्वा वामहस्ते रक्षाकङ्कणं निधाय दक्षिणहस्तेन पिधाय प्रतिसरसूक्तेनाभिमन्त्रयेत्—**

ॐ कृणुष्वपाजः प्रसितिन्नपृथ्वीं याहिराजेवामवाँ२ऽइभेन।

तृष्वीमनुप्प्रसितिन्द्रूणानोरत्तासिव्विद्धयरक्षसस्तपिष्ठैः॥

तवब्भ्रमासऽआशुया पतन्त्यनुस्पृश धृषताशोशुचानः।

तपू ँ ष्यग्ने जुह्वा पतङ्गानसन्दितोव्विसृजर्विष्वगुल्काः॥

प्रतिस्प्पशो विसृज तूर्णितमो भवापायुर्व्विशोऽअस्याऽअदब्धः।

योनो दूरेऽअघस ँ सोयोऽअन्त्यग्ने माकिष्टे व्व्यथिरादधर्षीत्॥

उदग्ने तिष्ठप्प्रत्त्यातनुष्वन्न्यमित्राँ२ऽ–ओषतात्तिग्ग्महेते।

योनोऽअरातिं ँ समिधान चक्क्रेनीचातन्धक्ष्यतसन्नशुष्कम्॥
ऊद्ध्वोंभवप्प्रति विद्ध्यस्मदाविष्कृणुष्वदैव्व्यान्यग्नेअवस्थिरा तनुहियातुजूनाञ्जामि मृजामि प्प्रमृणीहि शत्रून्। अग्ग्नेष्ट्वा तेजसा सादयामि॥

ॐ अग्निर्म्मूर्द्धादिवः ककुत्पतिः पृथिव्व्याऽअयम्।

अपा ँ रेता ँ सिजिन्वति। इन्द्रस्य त्त्वौजसा सादयामि॥

**ततो रक्षाकङ्कणं बध्नीयात् तत्र मन्त्रः—**

ॐ नतद्रक्षा ँ सि न पिशाचास्तरन्ति देवानामोजः प्रथमज ँ ह्येतत्। यो बिभर्तिदाक्षायण ँ हिरण्य ँ स देवेषु

कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ॥

ॐ बृहत्सामक्षत्रभृद्‌बृद्धबृष्ण्यंत्रिष्टुभौजः सुभितमुग्रवीरम्।
इन्द्रस्तोमेन पञ्चदशेन मध्यमिदं वा तेन सगरेण रक्ष ॥

ॐ जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।

नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ॥

**कर्ता स्वदेहे न्यासपूर्वकं भगवतः आराधनां कुर्यात्—**

## संहारन्यासः

ॐ लां नमःपराय सर्वात्मने नारायणाय नमः ।इति पादयोर्न्यसेत् ।

ॐ वां नमःपराय निवृत्यात्मनेऽनिरुद्धाय नमः । इत्युपस्थेन्यसेत् ।

ॐ रां नमःपराय विश्वात्मने प्रद्युम्नाय नमः । इति हृदयेन्यसेत् ।

ॐ यां नमःपराय पुरुषात्मने संकर्षणाय नमः । इति नासाग्रेन्यसेत् ।

ॐ षां नमःपराय परमेष्ठ्यात्मने वासुदेवाय नमः इति मूर्ध्निन्यसेत् ।

**इति पञ्चमन्त्रैर्ध्यानद्वारा प्राकृतपञ्चतत्वानां संहारम्विधाय अग्रिमपञ्चमन्त्रैर्भगवद्ध्यानेन दिव्यतत्त्वमुत्पाद्य तेनदिव्यतत्त्वेन श्रीभगवदाराधनाकरणयोग्यं दिव्यदेहप्राप्तिं भावयेत्—**

## अथ सृष्टिन्यासः

ॐ षां नमःपराय परमेष्ठ्यात्मने वासुदेवाय नमः । इति मूर्ध्निन्यसेत् ।

ॐ यां नमः पराय पुरुषात्मने संकर्षणाय नमः । इति नासाग्रेन्यसेत् ।

ॐ रां नमःपराय विश्वात्मने प्रद्युम्नाय नमः । इति हृदयेन्यसेत् ।

ॐ वां नमःपराय निवृत्यात्मनेऽनिरुद्धाय नमः । इत्युपस्थेन्यसेत् ।

ॐ लां नमःपराय सर्वात्मने नारायणाय नमः । इति पादयोर्न्यसेत् ।

## स्थितिन्यासः

ॐ रां नमःपराय विश्वात्मने प्रद्युम्नाय नमः । इति हृदयेन्यसेत् ।

ॐ वां नमःपराय निवृत्यात्मनेऽनिरुद्धाय नमः । इत्युपस्थेन्यसेत् ।

ॐ लां नमःपराय सर्वात्मने नारायणाय नमः । इति पादयोर्न्यसेत् ।

ॐ षां नमःपराय परमेष्ठ्यात्मने वासुदेवाय नमः । इति मूर्ध्निन्यसेत् ।

ॐ यां नमः पराय पुरुषात्मने संकर्षणाय नमः । इति नासाग्रेन्यसेत् ।

अथ गुरुपरम्परानुसन्धानपूर्वकं सेवाप्रारम्भं कुर्यात्—

लक्ष्मीनाथसमारम्भां नाथयामुनमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

संसारसिन्धोस्तरणैकहेतून्दधे गुरून्मूर्ध्नि हरिस्वरूपान् ।
रजांसि येषां पदपङ्कजानां तीर्थाभिषेकश्रियमावहन्ति ॥

स्वशेषभूतेन मया स्वीयैः सर्वपरिच्छदैः ।
विधातुम्प्रीतमात्मानं देवः प्रक्रमते स्वयम् ॥

कूर्मादीन्दिव्यलोकाँस्तदनुमणिमयम्मण्डपं तत्र शेषं
तस्मिन्धर्मादिपीठं तदुपरिकमलं चामरग्राहिणींश्च ।

विष्णुं देवीविभूषायुधगणमुरगं पादुके वैनतेयं

सेनेशं द्वारपालान्कुमुदमुखगणान्विष्णुभक्तान्प्रपद्ये।

**एवं गुरुपरम्पराम्भगवत्परिवारांश्च ध्यात्वा प्रथमं बलमन्त्रमनुसन्धाय**

**बलमन्त्रः-**

भगवतोबलेन भगवतोवीर्य्येण भगवतस्तेजसा भगवतः कर्म करिष्यामि । भगवानेव स्वनियाम्यस्वरूपस्थिति प्रवृत्तिस्वशेषतैकरसेन मया स्वकीयैश्च उपकरणैः स्वाराधनैकप्रयोजनाय परम पुरुषः सर्वशेषी सर्वेश्वरः स्वयमेव स्वशेषभूतमिदममुकनामाख्यां स्वसमाराधनां कारयति॥

**इति बलमन्त्रमनुसन्धाय ततः प्रथमम्पुरुषसूक्तस्य मन्त्रमुच्चार्यानन्तरं पौराणिकश्लोकमुक्त्वा तत उत्तरवाक्येनोपचारान्दद्यात्।**

## भगवदाराधनाविधिः

**आवाहनम्-**

नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे।

सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः॥

ॐ सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात्।

सभूमि ँ सर्व्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम्॥

आवाहयाम्यमरवृन्दनताङ्घ्रियुग्मं

लक्ष्मीपतिम्भुवनकारणमप्रमयेम्।

आद्यं सनातनतनुम्प्रणवासनस्थं

पूर्णेन्दुभास्करहुताशसहस्रदीप्तिम् ॥

**श्रीमन्नारायणमावाहयामि स्थापयामि पूजयामीत्यावाहयेत्—**

**आसनम्—**

ॐ पुरुषऽएवेद ँ सर्वंय्यद्भूतंय्यच्च भाव्यम् ।

उतामृतत्त्वस्येशानो यदन्नेनातिरोहति ॥

सद्रत्नजाम्बूनदनिर्मितम्विभो वरासनं सर्ववरप्रदायते ।

समर्पये सर्वजगन्निवासिने सुनिर्मलज्ञानधनप्रदायिने ॥

**श्रीमतेनारायणाय नमः आसनं समर्पयामि ।**

अथ भगवतो दिव्यमङ्गल विग्रहे न्यासान् कुर्यात् ।

**पुरुषसूक्तन्यासः**

| मन्त्रः | न्यासः |
|---|---|
| सहस्रशीर्षा० | भगवतो वामकरे |
| पुरुष एवेदगुँ० | भगवतो दक्षिणकरे |
| एतावानस्य० | भगवतो वामचरणे |
| त्रिपादूर्ध्व० | भगवतो दक्षिणचरणे |
| ततोविराट्० | भगवतो वामजानुनि |
| तस्माद्यज्ञात्० | भगवतो दक्षिणजानुनि |
| तस्माद्यज्ञात्० | भगवतो वामकट्याम् |
| तस्मादश्वा० | भगवतो दक्षिणकट्याम् |

| | |
|---|---|
| तं यज्ञं बर्हिषि० | भगवतो नाभौ |
| यत्पुरुषं व्यदधुः० | भगवतो हृदये |
| ब्राह्मणोऽस्य० | भगवतो वामकक्षे |
| चन्द्रमा० | भगवतो दक्षिण कक्षे |
| नाभ्याऽआसीत्० | भगवतः कण्ठे |
| यत्पुरुषेण० | भगवतो मुखारविन्दे |
| सप्तास्यासन्० | भगवतो नेत्रयोः |
| यज्ञेन यज्ञम् | भगवतो मस्तके |

**अर्घ्यम्–** ॐ एतावानस्य महिमातोज्ज्यायाँश्च पूरुषः।
पादोऽस्य व्विश्वाभूतानि त्रिपादस्यामृतन्दिवि ॥

यः सर्वलोकस्यसमाश्रयश्च पूज्यश्च मान्यश्च दिवौकसामपि गृह्णातु सोऽर्घ्यम्परिपूर्णकामः प्रसीदताम्ब्रह्ममहाविभूतिः ॥ श्रीमते नारायणाय नमः पाद्यं समर्पयामि ।

**पाद्यम्–** ॐ त्रिपादूर्द्ध्वमुदैत्पुरुषः पादोस्येहाभवत्पुनः ।
ततो व्विष्वङ्व्यक्क्रामत्साशनानशनेऽअभिः ॥

यो राजते यज्ञपतिश्च यज्ञे सर्वस्य लोकस्य शरण्यभूतः ।
यज्ञेश्वरो यज्ञवपुश्च विष्णुः पाद्यम्प्रगृह्णातु स वासुदेवः ॥
श्रीमते नारायणाय नमः अर्घ्यं समर्पयामि ।

**आचमनीयम्–** ॐ ततो विराडजायतव्विराजोऽअधिपूरुषः।
सजातोऽअत्यरिच्यतपश्चाद्भूमिमथो पुरः ॥

योऽसौ भवान्सर्वजगत्प्रधानो यस्य प्रसादेन भवन्ति लोकाः।

सत्वं कुरुष्वाचमनं वरेण्य भव प्रसन्नो मयि दीननाथ॥

श्रीमते नारायणाय नमः आचमनीयं समर्पयामि ।

**स्नानीयम्-** ॐ तस्माद्यज्ञात्सर्व्वहुतः सम्भृतम्पृषदाज्यम्।

पशूँस्ताँश्चक्रे व्वायव्यानारण्याग्राम्याश्च ये॥

समाहृतैः स्वर्णघटैश्च स्वच्छैः स्वर्लोकस्रोतस्विनिदिव्यतीर्थैः।

स्नानं कुरुष्वाच्युतदिव्यमूर्ते देवाग्रजानान्निधनप्रदायिन्॥

श्रीमते नारायणाय नमः स्नानं समर्पयामि।

**ततः पञ्चामृतस्नानं कुर्यात्—**

**दुग्धस्नानम्-** ॐ सन्तेपया ँ सि समुयन्तुवाजाः सम्वृष्ण्यान्यभिमातिषाहः। आप्यायमानोऽअमृताय सोमदिविश्रवा ँ स्युत्तमानिधिष्व॥

श्रीमते नारायणाय नमः दुग्धस्नानं समर्पयामि।

**शुद्धोदकस्नानम् -** ॐ इतोन्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना।

शुद्धैरुक्थैवावृधासंशुध्या आशीर्वान्ममत्तु॥

श्रीमते नारायणाय नमः शुद्धोदकस्नानं समर्पयामि॥

**दधिस्नानम्-** ॐ दधिक्राब्णो अकारिषं जिष्णोरश्वस्य वाजिनः।

सुरभिनो मुखाकरत्प्रणऽआयू ँ षितारिषत्॥ श्रीमते नारायणाय नमः दधिस्नानं समर्पयामि। दधिस्नानान्ते शुद्धोदकस्नानं समर्पयामि॥

ॐ तेजः पशूनां हविरिन्द्रियावत्परिश्रुता पयसा सारघंमधु। अश्विभ्यां दुग्धम्भिषजा सरस्वत्या सुता सुताभ्याममृतसोम इन्दुः॥

ॐ श्रीमते नारायणाय नमः घृतस्नानं समर्पयामि।

घृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि॥

**मधुस्नानम्–** ॐ मधुव्वाताऽऋतायते मधुक्षरन्तिसिन्धवः। माध्वीर्नः सन्त्वोषधीः। ॐ मधुनक्तमुतोषसो मधुमत्पार्थिव ँ रजः। मधुद्यौरस्तुनः पिता॥ ॐ मधुमान्नोवनस्पतिर्मधुमाँ२अस्तुसूर्यः। माध्वीर्गावो भवन्तु नः॥

ॐ श्रीमते नारायणाय नमः मधुस्नानं समर्पयामि। मधुस्नानान्ते शुद्धोदकस्नानं समर्पयामि॥

**शर्करास्नानम्–** ॐ ताः शर्कराऽअभवंस्तच्छर्कराणां शर्करात्वं। पशुरग्निऽर्यच्छर्कराभिरग्निम्। परिमृणोति वज्रेणैवास्मिन्पशून्परिदधाति॥

ॐ श्रीमते नारायणाय नमः शर्करास्नानं समर्पयामि। शर्करास्नानान्ते शुद्धोदकस्नानं समर्पयामि॥

**वस्त्रम्–** ॐ तस्माद्यज्ञात्सर्वहुतऽऋचः सामानि जज्ञिरे।

छन्दा ँ सिजज्ञिरेतस्माद्यजुस्तस्मादजायत॥

शुद्धस्त्वमात्मा पुरुषः पुराणो जगत्सुतत्वं सुरलोकनाथ।

वस्त्राणि गृह्णीष्व मयार्पितानि दूकूलकौशेयसुपट्टकानि॥

ॐ श्रीमते नारायणाय नमः वस्त्राणि समर्पयामि।

**यज्ञोपवीतम्-** ॐ तस्मादश्वाऽअजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरेतस्मात्तस्माज्जाताऽअजावयः ॥

कार्पासतन्तूद्भवब्रह्मसूत्रं सूत्रात्मने सर्वचराचरस्य ।
समर्पये सात्वतपुङ्गवाय तेजः स्वरूपायसुखप्रदाय ॥

ॐ श्रीमते नारायणाय नमः यज्ञोपवीतं समर्पयामि ।

**ऊर्ध्वपुण्ड्रम्-** ॐ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषञ्जातमग्रतः ।
तेन देवाऽअयजन्त साध्याऽऋषयश्चये ॥

ॐ श्रीमते नारायणाय नमः ऊर्ध्वपुण्ड्रं समर्पयामि ।

**श्रीचन्दनम्-**

आनन्दनो यः सुमतां परात्मा तापत्रयस्योपशमश्चयस्मात्
तस्मै प्रयच्छामि सुचन्दनं वै काश्मीरकर्पूरविभावितं च ॥

ॐ श्रीमते नारायणाय नमः चन्दनं समर्पयामि ।

**पुष्पमाला-** ॐ यत्पुरुषं व्यदधुः कतिधाव्यकल्पयन् ।
मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्येते ॥

यः सर्वगन्धोऽखिलविश्वरूपस्तस्मै प्रसूनानि समर्पयामि ।
कदम्बजातीबकुलोद्भवानि कुशेशयश्रीतुलसीदलानि ॥

ॐ श्रीमते नारायणाय नमः पुष्पाणि समर्पयामि ।

**धूपम्**– ॐ ब्राह्मणोऽस्य मुखमासीद्बाहूराजन्यः कृतः।

ऊरूतदस्य यद्वैश्यः पद्भ्या ँ शूद्रोऽअजायत॥

धूपं दशाङ्गं शुभगन्धकञ्च गोसर्पिषाक्तं हृदयप्रियञ्च।

समर्पये दिव्यनभास्पदाय क्षीराब्धिजासेवितसत्पदाय॥

ॐ श्रीमतेनारायणाय नमः दशाङ्गधूपं समर्पयामि।

**दीपम्**–ॐ चन्द्रमा मनसोजातश्चक्षोः सूर्योऽअजायत।

श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत॥

आदित्यचन्द्राग्निप्रकाशकाय वै सदाचिदानन्दमयाव्ययाय च।

स्वाज्येन युक्तं शुभवर्त्तिभूषितं दीपम्प्रयच्छामितमः प्रणाशकम्॥

ॐ श्रीमते नारायणाय नमः दीपं दर्शयामि । ततःघृतदधि मधुकर्पूरान्वितं मधुपर्कम् भगवते निवेदयेत्॥

यौऽसौभवांस्तिष्ठति सर्वदेहे नारायणः सर्वजगत्प्रधानः।

गृहाण चैवं सुरलोकनाथ भक्तोपनीतम्मधुपर्कसंज्ञम्॥

ॐ श्रीमते नारायणाय नमः मधुपर्कं समर्पयामि।

**नैवेद्यम्**– ॐ नाभ्याऽआसीदन्तरिक्ष ँ शीर्ष्णोद्यौः समवर्तत।

पद्भ्याम्भूमिर्दिशः श्रोत्रात्तथालोकाँ३ऽअकल्पयन्॥

द्विजस्त्रीणाम्भक्ते मृदुनि विदुरान्ने व्रजगवां

दधि क्षीरेसख्युः स्फुटचिपिटमुष्टौ मुररिपो।
यशोदायास्तन्ये व्रजयुवति दत्ते मधुनि ते
यथासीदामोदस्तमयमुपहारेऽपि कुरुताम्॥

ॐ श्रीमते नारायणाय नमः नैवेद्यं निवेदयामि।

**ताम्बूलम्-** ॐ यत्पुरुषेण हविषा देवायज्ञमतन्वत।
वसन्तोऽस्यासीदाज्यङ्ग्रीष्मऽइध्मः शरद्धविः॥

एलादिपूगीफलचन्द्रसंयुतं प्रशस्तदेशोद्भवसौरभास्पदम्।
ताम्बूलपत्रम्भगवन्समर्पये भवप्रवाहोपरमाय तेऽच्युत॥

ॐ श्रीमते नारायणाय नमः ताम्बूलं समर्पयामि।

**नीराजनम्-** ॐ सप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः
देवायद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम्॥

सुवर्तिकर्पूरविदीपितेन सुवर्णपात्रे विनियोजितेन।
नीराजये त्वामहमप्रमेय दिव्येन दीपेन दिवप्रदेन॥

ॐ श्रीमते नारायणाय नमः नीराजनं समर्पयामि।

ॐ यज्ञेन यज्ञमयजन्तदेवास्तानि धर्म्माणि प्रथमान्यासन्।
तेह नाकम्महिमानः सचन्त यत्र पूर्व्वे साद्ध्याः सन्ति देवाः॥

ॐ श्रीमतेनारायणाय नमः प्रणामङ्करोमि इति साष्टाङ्गं कृत्वार्चनादिकं कुर्यात्—

## मन्त्रपुष्पाञ्जलिः

ॐ तद्विष्णोः परमम्पद ँ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवा ँ सः समिन्धते विष्णोर्यत्परमम्पदम् ॥ पर्याप्त्यानन्तरायाय सर्वस्तोमोऽतिरारात्रमुत्तममहर्भवति सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेव तेनाप्नोति सर्वञ्जयति हरिः ॐ शान्तिः ३

ॐ अग्निमीडे पुरोहितं यज्ञस्यदेवमृत्विजम् । होतारं रत्नधातमम् ॥

ॐ इषेत्वोर्ज्जेत्वा वायवस्थदेवोवःसविता प्रार्प्पयतु श्रेष्ठतमायकर्म्मणे ।

ॐ अग्नऽआयाहि वीतये गृणानो हव्यदातयेनिहोतासत्सि बर्हिषि ॥

ॐ शन्नोदेवीरभिष्टयऽआपो भवन्तु पीतये ।शंयोरभि स्रवन्तुनः ॥

ॐ इत्यग्रे व्याहरेत् । नम इति पश्चात् । नारायणायेत्युपरिष्टात् ॐ इत्येकाक्षरम् । नम इति द्वे अक्षरे । नारायणायेति पञ्चाक्षराणि एतद्वैनारायणस्याष्टाक्षरम्पदम् । यो ह वै नारायणस्याष्टाक्षरम्पदमध्येति अनपब्रुवः सर्वमायुरेति । विन्दते प्राजापत्यं रायस्पोषं गोपत्यं ततोऽमृतत्वमश्नुते । ततोऽमृतत्वमश्नुत इति य एवं वेद इत्युपनिषत् । हरिः ॐ शान्तिः शान्तिः शान्तिः ।

सुगन्धवल्ली शतपत्रजाती सुवर्णचम्पावकुलोद्भवानि।
गृहाणदेवेश मयार्पितानि प्रभो हरे ! श्रीतुलसी दलानि ॥

१. ॐ केशवाय नमः
२. ॐ नारायणाय नमः
३. ॐ माधवाय नमः
४. ॐ गोविन्दाय नमः
५. ॐ विष्णवे नमः
६. ॐ मधुसूदनाय नमः
७. ॐ त्रिविक्रमाय नमः
८. ॐ वामनाय नमः
९. ॐ श्रीधराय नमः
१०. ॐ हृषीकेशाय नमः
११. ॐ पद्मनाभाय नमः
१२. ॐ दामोदराय नमः
१३. ॐ वासुदेवाय नमः
१४. ॐ सङ्कर्षणाय नमः
१५. ॐ प्रद्युम्नाय नमः
१६. ॐ अनिरुद्धाय नमः
१७. ॐ पुरुषोत्तमाय नमः
१८. ॐ अधोक्षजाय नमः
१९. ॐ नारसिंहाय नमः
२०. ॐ अच्युताय नमः
२१. ॐ जर्नादनाय नमः
२२. ॐ उपेन्द्राय नमः
२३. ॐ हरये नमः
२४. ॐ श्रीकृष्णाय नमः

## श्रीकृष्णाष्टोत्तरशतनामावलिः

१. ॐ श्रीकृष्णाय नमः
२. ॐ कमलानाथाय नमः
३. ॐ वासुदेवाय नमः
४. ॐ सनातनाय नमः
५. ॐ वसुदेवात्मजाय नमः
६. ॐ पुण्याय नमः
७. ॐ लीलामानुषविग्रहाय नमः
८. ॐ श्रीवत्सकौस्तुभधराय नमः
९. ॐ यशोदावत्सलाय नमः
१०. ॐ हरये नमः

११. ॐ चतुर्भुजात्तशंखारि-

गदाखड्गाद्युदायुधाय नमः

१२. ॐ देवकीनन्दनाय नमः

१३. ॐ श्रीशाय नमः

१४. ॐ नन्दगोपप्रियात्मजाय नमः

१५. ॐ यमुनावेगसंहारिणे नमः

१६. ॐ बलभद्रप्रियानुजाय नमः

१७. ॐ पूतनाजीवितहराय नमः

१८. ॐ शकटासुरभञ्जनाय नमः

१९. ॐ नन्दव्रजजनानन्दिने नमः

२०. ॐ सच्चिदानन्दविग्रहाय नमः

२१. ॐ नवनीतविलिप्ताङ्गाय नमः

२२. ॐ नवनीतनटाय नमः

२३. ॐ अनघाय नमः

२४. ॐ नवनीतनवाराहाय नमः

२५. ॐ मुचुकुन्दप्रसादकाय नमः

२६. ॐ षोडशस्त्रीसहस्रेशाय नमः

२७. ॐ त्रिभङ्गललिताकृतये नमः

२८. ॐ शुकवागमृताब्धीन्दवे नमः

२९. ॐ गोविन्दाय नमः

३०. ॐ योगिनाम्पतये नमः

३१. ॐ वत्सवाटचराय नमः

३२. ॐ अनन्ताय नमः

३३. ॐ धेनुकासुरमर्दनाय नमः

३४. ॐ तृणीकृततृणावर्ताय नमः

३५. ॐ यमलार्जुनभञ्जनाय नमः

३६. ॐ उत्तालतालभेत्त्रे नमः

३७. ॐ तमालश्यामलाकृतये नमः

३८. ॐ गोपगोपीश्वराय नमः

३९. ॐ योगिने नमः

४०. ॐ कोटिसूर्यसमप्रभाय नमः

४१. ॐ इलापतये नमः

४२. ॐ परञ्ज्योतिषे नमः

४३. ॐ यादवेन्द्राय नमः

४४. ॐ यदूद्वहाय नमः

४५. ॐ वनमालिने नमः

४६. ॐ पीतवाससे नमः

४७. ॐ पारिजातापहारकाय नमः

४८. ॐ गोवर्धनाचलोद्धर्त्रे नमः

४९. ॐ गोपालाय नमः

५०. ॐ सर्वपालकाय नमः

५१. ॐ अजाय नमः

५२. ॐ निरञ्जनाय नमः

५३. ॐ कामजनकाय नमः

५४. ॐ कञ्जलोचनाय नमः

५५. ॐ मधुघ्ने नमः

५६. ॐ मथुरानाथाय नमः

५७. ॐ द्वारकानायकाय नमः

५८. ॐ बलिने नमः

५९. ॐ वृन्दावनान्तस्संचारिणे नमः

६०. ॐ तुलसीदामभूषणाय नमः

६१. ॐ स्यमन्तकमणेहर्त्रे नमः

६२. ॐ नरनारायणात्मकाय नमः

६३. ॐ कुब्जाकृष्टाम्बरधराय नमः

६४. ॐ मायिने नमः

६५. ॐ परमपुरुषाय नमः

६६. ॐ मुष्टिकासुरचाणूरमल्ल-
युद्धविशारदाय नमः

६७. ॐ संसारवैरिणे नमः

६८. ॐ कंसारये नमः

६९. ॐ मुरारये नमः

७०. ॐ नरकान्तकाय नमः

७१. ॐ अनादिब्रह्मचारिणे नमः

७२. ॐ कृष्णाव्यसनकर्षकाय नमः

७३. ॐ शिशुपालशिरश्छेत्रे नमः

७४. ॐ दुर्योधनकुलान्तकाय नमः

७५. ॐ विदुराक्रूरवरदाय नमः

७६. ॐ विश्वरूपप्रदर्शकाय नमः

७७. ॐ सत्यवाचे नमः

७८. ॐ सत्यसङ्कल्पाय नमः

७९. ॐ सत्यभामारताय नमः

८०. ॐ जयिने नमः

८१. ॐ सुभद्रापूर्वजाय नमः

८२. ॐ जिष्णवे नमः

८३. ॐ भीष्ममुक्तिप्रदायकाय नमः

८४. ॐ जगद्गुरवे नमः

८५. ॐ जगन्नाथाय नमः

८६. ॐ वेणुनादविशारदाय नमः

८७. ॐ वृषभासुरविध्वंसिने नमः

८८. ॐ बाणासुरकरान्तकाय नमः

८९. ॐ युधिष्ठिरप्रतिष्ठात्रे नमः

९०. ॐ बर्हिबर्हावतंसकाय नमः

९१. ॐ पार्थसारथये नमः

९२. ॐ अव्यक्ताय नमः

९३. ॐ गीतामृतमहोदधये नमः

९४. ॐ कालियफणमाणिक्य-
रञ्जितश्रीपदाम्बुजाय नमः

९५. ॐ दामोदराय नमः

९६. ॐ यज्ञभोक्त्रे नमः

९७. ॐ दानवेन्द्रविनाशकाय नमः

९८. ॐ नारायणाय नमः

९९. ॐ परब्रह्मणे नमः

१००. ॐ पन्नगाशनवाहनाय नमः

१०१. ॐ जलक्रीडासमासक्तगोपी-
वस्त्रापहारकाय नमः

१०२. ॐ पुण्यश्लोकाय नमः

१०३. ॐ तीर्थपादाय नमः

१०४. ॐ वेदवेद्याय नमः

१०५. ॐ दयानिधये नमः

१०६. ॐ सर्वतीर्थात्मकाय नमः

१०७. ॐ सर्वग्रहरूपिणे नमः

१०८. ॐ परात्पराय नमः

१०९. ॐ श्रीकृष्णाय परब्रह्मणे नमः

११०. ॐ श्रीरुक्मिणीसत्यभामासहित-
श्रीवेणीमाधवस्वामिने नमः

१११. ॐ श्रीमते नारायणाय नमः

१. ॐ श्रियै नमः

२. ॐ अमृतोद्भवायै नमः

३. ॐ कमलायै नमः

४. ॐ चन्द्रसोदर्यै नमः

५. ॐ विष्णुपत्न्यै नमः

६. ॐ वैष्णव्यै नमः

७. ॐ वरारोहायै नमः

८. ॐ हरिवल्लभायै नमः

९. ॐ शार्ङ्गिण्यै नमः

१०. ॐ देवदेविकायै नमः

११. ॐ लोकसुन्दर्यै नमः

१२. ॐ श्रीमहालक्ष्म्यै नमः

# श्रीलक्ष्म्यष्टोत्तरशतनामावलिः

१. ॐ प्रकृत्यै नमः
२. ॐ विकृत्यै नमः
३. ॐ विद्यायै नमः
४. ॐ सर्वभूतहितप्रदायै नमः
५. ॐ श्रद्धायै नमः
६. ॐ विभूत्यै नमः
७. ॐ सुरभ्यै नमः
८. ॐ परमात्मिकायै नमः
९. ॐ वाचे नमः
१०. ॐ पद्मालयायै नमः
११. ॐ पद्मायै नमः
१२. ॐ शुचये नमः
१३. ॐ स्वाहायै नमः
१४. ॐ स्वधायै नमः
१५. ॐ सुधायै नमः
१६. ॐ धन्यायै नमः
१७. ॐ हिरण्मय्यै नमः
१८. ॐ लक्ष्म्यै नमः
१९. ॐ नित्यपुष्टायै नमः
२०. ॐ विभावर्यै नमः
२१. ॐ अदित्यै नमः
२२. ॐ दित्यै नमः
२३. ॐ दीप्तायै नमः
२४. ॐ वसुधायै नमः
२५. ॐ वसुधारिण्यै नमः
२६. ॐ कमलायै नमः
२७. ॐ कान्तायै नमः
२८. ॐ क्षमायै नमः
२९. ॐ क्षीरोदसंभवायै नम
३०. ॐ अनुग्रहपरायै नमः
३१. ॐ ऋद्धये नमः
३२. ॐ अनघायै नमः
३३. ॐ हरिवल्लभायै नमः
३४. ॐ अशोकायै नमः
३५. ॐ अमृतायै नमः
३६. ॐ दीप्तायै नमः
३७. ॐ लोकशोकविनाशिन्यै नम
३८. ॐ धर्मनिलयायै नमः



upayogibooks.com

३९. ॐ करुणायै नमः
४०. ॐ लोकमात्रे नमः
४१. ॐ पद्मप्रियायै नमः
४२. ॐ पद्महस्तायै नमः
४३. ॐ पद्माक्ष्यै नमः
४४. ॐ पद्मसुन्दर्यै नमः
४५. ॐ पद्मोद्भवायै नमः
४६. ॐ पद्ममुख्यै नमः
४७. ॐ पद्मनाभप्रियायै नमः
४८. ॐ रमायै नमः
४९. ॐ पद्ममालाधरायै नमः
५०. ॐ देव्यै नमः
५१. ॐ पद्मिन्यै नमः
५२. ॐ पद्मगन्धिन्यै नमः
५३. ॐ पुण्यगन्धायै नमः
५४. ॐ सुप्रसन्नायै नमः
५५. ॐ प्रसादाभिमुख्यै नमः
५६. ॐ प्रभायै नमः
५७. ॐ चन्द्रवदनायै नमः
५८. ॐ चन्द्रायै नमः
५९. ॐ चन्द्रसहोदर्यै नमः
६०. ॐ चतुर्भुजायै नमः
६१. ॐ चन्द्ररूपायै नमः
६२. ॐ इन्दिरायै नमः
६३. ॐ इन्दुशीतलायै नमः
६४. ॐ आह्लादजनन्यै नमः
६५. ॐ पुष्ट्यै नमः
६६. ॐ शिवायै नमः
६७. ॐ शिवकर्य्यै नमः
६८. ॐ सत्यै नमः
६९. ॐ विमलायै नमः
७०. ॐ विश्वजनन्यै नमः
७१. ॐ तुष्ट्यै नमः
७२. ॐ दारिद्र्यनाशिन्यै नमः
७३. ॐ प्रीतिपुष्करिण्यै नमः
७४. ॐ शान्तायै नमः
७५. ॐ शुक्लमाल्याम्बरायै नमः
७६. ॐ श्रियै नमः
७७. ॐ भास्कर्यै नमः
७८. ॐ बिल्वनिलयायै नमः

७९. ॐ वरारोहायै नमः

८०. ॐ यशस्विन्यै नमः

८१. ॐ वसुन्धरायै नमः

८२. ॐ उदाराङ्गायै नमः

८३. ॐ हरिण्यै नमः

८४. ॐ हेममालिन्यै नमः

८५. ॐ धनधान्यकर्यै नमः

८६. ॐ सिद्धये नमः

८७. ॐ स्त्रैणसौम्यायै नमः

८८. ॐ शुभप्रदायै नमः

८९. ॐ नृपवेश्मगतानन्दायै नमः

९०. ॐ वरलक्ष्म्यै नमः

९१. ॐ वसुप्रदायै नमः

९२. ॐ शुभायै नमः

९३. ॐ हिरण्यप्राकारायै नमः

९४. ॐ समुद्रतनयायै नमः

९५. ॐ जयायै नमः

९६. ॐ मङ्गलादेव्यै नमः

९७. ॐ विष्णुवक्षःस्थलस्थितायै नमः

९८. ॐ विष्णुपत्न्यै नमः

९९. ॐ प्रसन्नाक्ष्यै नमः

१००. ॐ नारायणसमाश्रितायै नमः

१०१. ॐ दारिद्र्यध्वंसिन्यै नमः

१०२. ॐ देव्यै नमः

१०३. ॐ सर्वोपद्रववारिण्यै नमः

१०४. ॐ नवदुर्गायै नमः

१०५. ॐ महाकाल्यै नमः

१०६. ॐ ब्रह्मविष्णुशिवात्मिकायै नमः

१०७. ॐ त्रिकालज्ञानसंपन्नायै नमः

१०८. ॐ भुवनेश्वर्यै नमः

१०९. ॐ श्रीदेव्यै नमः

११०. ॐ भूदेव्यैः नमः

१११. ॐ नीलादेव्यै नमः

११२. ॐ गोदादेव्यै नमः

११३. ॐ श्रीरङ्गनायक्यैमहालक्ष्म्यै नमः

ॐ आधारशक्त्यादि समस्त वैकुण्ठपार्षदेभ्यो नमः

ॐ श्रीमते विष्वक्सेनाय नमः

ॐ श्रीशेषाय नमः ॐ गरुडाय नमः

ॐ श्रीसुदर्शनाय हेतिराजाय नमः

ॐ पाञ्चजन्याय शंखाधिपतये नमः

ॐ कौमोदक्यै गदाधिपतये नमः

ॐ नन्दकाय खड्गाधिपतये नमः

ॐ शार्ङ्गाय चापाधिपतये नमः

ॐ सर्वेभ्यो दिव्यायुधेभ्यो नमः

ॐ सर्वेभ्यो भगवत्परिकरेभ्यो नमः

ॐ सर्वाभ्यो भगवत्परिचारिकाभ्यो नमः

ॐ अस्मद्गुरुभ्यो नमः

ॐ अस्मत्परमगुरुभ्यो नमः

ॐ अस्मत्सर्वगुरुभ्यो नमः

ॐ श्रीमते रामानुजाय नमः

ॐ श्रीपराङ्कुशदासाय नमः

ॐ श्रीमद्यामुनमुनये नमः

ॐ श्रीराममिश्राय नमः

ॐ श्रीपुण्डरीकाक्षाय नमः

ॐ श्रीमन्नाथमुनये नमः

ॐ श्रीमते शठकोपाय नमः

ॐ श्रीमते विष्वक्सेनाय नमः

ॐ श्रियै नमः

ॐ श्रीधराय नमः

ॐ समस्तपरिवारविशिष्टाय श्रीमते नारायणाय नमः

**अर्चनादिकं विधाय भगवन्तं कर्पूरेण निराजनम् कुर्यात्।**

# अथाग्निकुण्डकृत्यम्

## अथेन्धनशोधनम्।

ॐ कस्त्वासत्यो मदानाम्म ँ हिष्ठो मत्सदन्धसः। दृढाचिदारुजे व्वसु॥

**कुण्डे इन्धनस्थापनम्—**

ॐ त्वामिद्धि हवामहेसातौ व्वाजस्यकारवः। त्वां व्वृत्रे ष्ष्विन्द्रसत्पतिन्नरस्त्वङ्काष्ठा सर्वतः॥

**यथा संभवं निर्धूममग्नि— मताम्रादिपात्राभ्यामादद्यात्—**

ॐ येनऽऋषयस्तपसासत्रमायान्निन्धानाऽअग्निं स्वराभरन्तः। तस्मिन्नहं निदधे नाकेऽअग्निं यमाहुर्मनवस्तीर्ण बर्हिषम्॥

त्वं मुखं सर्वदेवानां सप्तार्चिरमितद्युते।

आगच्छ भगवन्नग्ने यज्ञे सन्निहितो भव।

**अग्निशोधनम्—**

ॐ अग्नावग्निश्चरतिप्रविष्टऽऋषीणाम्पुत्रोऽअभिशस्तिपावा। सनः स्योनः सुयजायजेह देवेभ्यो हव्य ँ सदमप्रयुच्छन्त्स्वाहा॥

**अथाग्निग्रहणम्—**

ॐ मयि गृह्णाम्यग्नेऽअग्नि ँ रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय। मामुदेवताः सचन्ताम्॥

अग्नेर्वैष्णवीकरणम्–

ॐ एषोह देवःप्रदिशोनु सर्वाःपूर्वोहजातः सऽउगर्भेऽअन्तः। सऽएव जातःसजनिष्यमाणः प्रत्यङ्जनांस्तिष्ठति सर्वतोमुखः॥

**इति मन्त्रेणाग्निमध्ये ऋतुस्नातया लक्ष्म्या सह भगवतः संयोगं विचिन्त्य समाहितगर्भां लक्ष्मीं ध्यात्वा ततोऽग्नेरुत्पत्तिं भावयेत् । एतदेवाग्नेर्वैष्णवीकरणम् तत एकस्मिन् पात्रे स्थापितमग्निमन्यपात्रेण पिधायाग्नेः षोडशसंस्कारान् कुर्यात्–**

## अथाग्निसंस्काराः

(१) ॐ गर्ब्भोऽअस्योषधीनां गर्ब्भोव्वनस्पतीनाम्। गर्ब्भो विश्वस्य भूतस्याग्ने गर्ब्भोऽअपामसि। ॐ हं अग्नयेशुचिचषदे नमःस्वाहा गर्भाधानसंस्कारं संपादयामि।

**इत्युक्त्वापीताक्षतान् विकिरन् वक्ष्यमाणमन्त्रं पठेत् एवं सर्वत्र कुर्यात्–**

(२) ॐ व्विवस्वन्नादित्त्यैषते सोमपीथस्तस्मिन्नमत्त्स्व । श्रदस्मै नरोव्वचसे दधातन यदाशीर्द्दाम्पतीव्वाममश्नुतः। पुमान्पुत्रो जायतेव्विन्दते व्वस्वधाव्विश्वाहारपऽएधते गृहे ।

ॐ हं अग्नयेशुचिषदे नमः स्वाहा **पुंसवनसंस्कारं संपादयामि।**

(३ ) ॐ अजीजनोहि पवमानसूर्यम्विधारे शक्मनापयः। गोजीरयार गूँ हमाणः पुरन्ध्या॥ ॐ हं अग्नयेशुचिषदे नमः स्वाहा **सीमन्तोनयनसंस्कारं संपादयामि।**

**ततोऽअग्निपिहितपात्रमुद्घाटयेत्–**

(४) ॐ एजतुदशमास्योगर्ब्भोजरायुणासह। यथायंव्वायुरेज-ति यथा समुद्रऽएजति। एवायन्दशमास्योऽअजस्रज्जरायुणा सह। ॐ हं अग्नये शुचिषदे नमः स्वाहा **जातकर्मसंस्कारं संपादयामि।**

**अथ कुण्डेऽग्निन्निधाय प्रज्वालयेत्–**

ॐ अग्निम्मूर्द्धादिवः ककुत्पतिः पृथिव्याऽअयम्। अपा ँ रेता ँ सिजिन्वति॥

ॐ स्थिरोभव व्वीड्वङ्गऽआशुर्भव व्वाज्यर्वन्। पृथुर्ब्भव सुखदस्त्वमग्नेः पुरीषवाहणः॥

(५) ॐ यदा पिपेषमातरम्पुत्रः प्रमुदितो धयन्। एतत्तदग्नेऽअनृणो भवाम्यहतौ पितरौ मया। सम्पृचस्थ सम्माभद्रेण पृङ्क्त व्विपृचस्थ व्विमापाप्मना पृङ्क्त॥ ॐ हं अग्नये शुचिषदे नमः स्वाहा **नामकरण[३] संस्कारं संपादयामि।**

---

३ सूचना– यज्ञकर्मणि वह्नेर्वै नामसंकथ्यतेधुना।
पावको लौकिकोह्यग्निः प्रथमः परिकीर्तितः॥
अग्निस्तु मारुतो (भरतो) नाम गर्भाधाने विधीयते।
(तथा पुंसवने चैव सीमन्ते जातकर्मणि )
ततः पुसवने ज्ञेयः पावमानाख्य नामतः॥
सीमन्ते मङ्गलो नाम प्रवलो जातकर्मणि।
नामेषु पार्थिवो नाम्नि विज्ञेयः प्राशने तु शुचिस्मृतः॥
( चूडायां मङ्गलो नाम ह्यग्निष्टोमे प्रदायकः )
(आवसथ्ये भवेदग्निः स्थावरे पावको भवेत् )
( शान्तिके दारुणो नाम वायव्ये वरुणो भवेत् )
( युगान्ते चाक्षयो नाम वत्सरे प्रलयं गतः )
चौले तु सभ्य नामो वै व्रतबन्धे समुद्भवः।
गोदाने सूर्यनामाग्निर्विवाहे योजकस्मृतः॥
आवसथ्ये द्विजो ज्ञेयो वैश्वदेवे तु रुक्मकः।

(६) ॐ अन्नपतेन्नस्यनो देह्यनमीवस्य शुष्मिणः । प्रप्रदातारंतारिषऽऊर्ज्जन्नो धेहि द्विपदे शं चतुष्पदे। ॐ हं अग्नये शुचिषदे नमः स्वाहा **अन्नप्राशनसंस्कारं संपादयामि।**

(७) ॐ पूषापञ्चाक्षरेणपञ्चदिशऽउदजयत्ताऽउज्जेष ँ सविता षडक्षरेणषड्तूनुदजयत्तानुज्जेषम्मरुतः सप्ताक्षरेणसप्तग्ग्राम्म्यान् पशूनुदजयँस्त्तानुज्जेषं बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयत्तामुज्जेषं मित्रो नवाक्षरेण । ॐ हं अग्नयेशुचिषदेनमःस्वाहा **निष्क्रमणसंस्कारं संपादयामि**

(८) ॐ अग्नऽआयाहिव्वीतये गृणानो हव्यदातये। निहोता सत्सि बर्हिषि ॥ ॐ हं अग्नये शुचिषदे नमः स्वाहा **चूडाकरणसंस्कारं संपादयामि।**

(९) ॐ भद्रङ्कर्णेभिः श्रृणुयामदेवा भद्रं पश्येमाक्षभिर्य्यजत्राः । स्थिरैरङ्गैस्तुष्टुवा ँ सस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥

---

प्रायश्चित्ते विटश्चैव पाकयज्ञेषु पावकः ॥
देवानां हव्यवाहश्च पितृणां कव्यवाहनः ।
शान्तिके वरदः प्रोक्तः पौष्टिके बलवर्धनः ॥
पूर्णाहुत्यां मृडो नाम क्रोधाग्निश्चाभिचारके ।
वश्यार्थे कामदो ज्ञेयो वनदाहे तु दूषकः( दूतकः) ॥
कुक्षौ तु जाठरो ज्ञेयः क्रव्यादो मृतदाहके ।
लक्षहोमे वह्निनर्नाम कोटिहोमे हुताशनः ॥
वृषोत्सर्गे ध्वरो नाम शुद्धिकर्मे तु ब्राह्मणः।
समुद्रे वाडवो नाम यमे संवर्तकस्तथा ॥
गार्हस्पत्यो भवेत् ब्रह्मा दक्षिणाग्निस्तु ईश्वरः।
विष्णुराह्वनीयः स्यात् अग्नि होत्रे त्रयोऽग्नयः ॥
((अनुक्तो वै भवेत् यस्मिन् कर्मणि हव्यवाहनः ।
विष्णुनाम्नैव संपूज्य कर्तव्यं कर्ममुत्तमम् )) ॥

ॐ हं अग्नये शुचिषदे नमः स्वाहा **कर्णवेधसंस्कारं संपादयामि।**

(१०) ॐ अग्निरेकाक्षरेण प्राणमुदजयत्ता-मुज्जेषमश्विनौद्व्यक्षरेणद्विपदो मनुष्यानुदजयन्तानुज्जेषं व्विष्णुस्त्र्यक्षरेण त्रीँल्लोकानुदजयत्तानुज्जेष गूँ सोमश्चतुरक्षरेण चतुष्पदः पशूनुदजयत्तानुज्जेषं पूषापञ्चाक्षरेण ॥ ॐ हं अग्नये शुचिषदे नमः स्वाहा **उपनयनसंस्कारं संपादयामि।**

(११) ॐ वैश्वानराय विद्महे सप्तजिह्वाय धीमहि तन्नोऽअग्निः प्रचोदयात् ॥ ॐ हं अग्नये शुचिषदे नमः स्वाहा **सावित्रीश्रावणसंस्कारं संपादयामि।**

(१२) ॐ वेदोऽसि येन त्वन्देवव्वेद देवेब्भ्यो व्वेदोभवस्तेन मह्यं व्वेदो भूयाः। देवागातु विदोगातुं व्वित्त्वागातुमित। मनसस्पतऽइमन्देव यज्ञ ँ स्वाहाव्वातेधाः ॥ ॐ हं अग्नयेशुचिषदे नमः स्वाहा **वेदारम्भसंस्कारं संपादयामि।**

(१३) ॐ गावऽउपावतावतं महीयज्ञस्यरप्सुदा। उभा कर्ण्णाहिरण्यया॥ ॐ हंअग्नये शुचिषदे नमः स्वाहा **गोदानसंस्कारं संपादयामि।**

(१४) ॐ व्रतङ्कृणुतव्रतङ्कृणुताग्निर्ब्रह्मागिनर्यज्ञो वनस्पतिर्यज्ञियः। दैवीं धियं मनामहे सुमृडीकामभिष्टये वर्चोधां यज्ञवाह स ँ सुतीर्थानोऽअसद्वशे।

ॐ ये देवामनो जाता मनोयुजो दक्षक्रतवस्तेनोवन्तु ते नः पान्तुतेभ्यः स्वाहा। ॐ हं अग्नयेशुचिषदे नमः स्वाहा **स्नातकव्रतसंस्कारं संपादयामि।**

(१५) ॐ भगऽएवभगवाँ२ऽअस्तुदेवास्तेनव्व-यम्भगवन्तःस्याम।

तन्त्वा भगसर्व्वऽइज्जोहवीति सनो भगपुरऽएता भवेह ॥ॐ हं अंग्नये शुचिषदे नमः स्वाहा **विवाहसंस्कारं संपादयामि।**

(१६ ) ॐ अग्नेव्व्रतपते व्व्रतमचारिषन्तदशक-न्तन्मेराधीदमहं य्यऽएवास्मिसोऽस्मि ॥ ॐ हं अग्नये शुचिषदे नमः स्वाहा। **अवशिष्टसंस्कारं संपादयामि—**

ॐ अग्निन्दूतं पुरोदधे हव्यवाहमुपब्रुवे। देवाँ२आसादयादिह॥ ॐ हं अग्नये शुचिषदे नमः स्वाहा। वह्नेः षोडशसंस्कारपूर्तिरस्तु स्वाहा।

**ततः चन्दनपुष्पाक्षतानादाय हस्तौ संपुटीकृत्य प्रार्थयेत्—**

ॐ ऋतावानं व्वैश्वानरमृतस्य ज्ज्योतिषस्पतिम् । अजस्रङ्घर्म्ममीमहे । उपयामगृहीतोसि व्वैश्श्वानरायत्त्वैषतेयोनिर्व्वैश्श्वानरायत्वा।

ॐ वैश्श्वानरस्य सुमतौ स्याम राजाहिकं भुवनानामभिश्श्रीः। इतो जातो व्विश्वमिदं व्विचष्टे व्वैश्श्वानरो यतते सूर्येण । उपयामगृहीतोऽसि व्वैश्वानरायत्त्वैषतेयोनिर्व्वैश्वानरायत्त्वा ॥

ॐवैश्श्वानरोनऽऊतयऽआप्प्रयातुपरावतः। अग्निरुक्थेन व्वाहसा । उपयामगृहीतोऽसि व्वैश्वानरायत्त्वैषतेयोनिर्व्वैश्वानरायत्त्वा ॥

ॐ आवाहये त्वां पुरुषं महान्तं सुरासुरैर्वन्दितपादपद्मम्।
ब्रह्मादयो यस्य मुखे विशन्ति प्रविश्य कुण्डे सुरलोकनाथ ॥

# अथ अष्टवसुपूजनम्

तण्डुलपुञ्जेषु पूर्वादिक्रमेणाष्टवसूनावाह्यपूजयेत्—

ॐ अग्नये नमः अग्निमावाहयामि स्थापयामि पूजयामि ॥

ॐ जातवेदसे नमः जातवेदसमावाहयामि स्थापयामि पूजयामि ॥

ॐ सहोजसे नमः सहोजसमावाहयामि स्थापयामि पूजयामि ॥

ॐ अजिराप्रभवेनमः अजिराप्रभुमावाहयामि स्थापयामि पूजयामि ॥

ॐ वैश्वानराय नमः वैश्वानरमावाहयामि स्थापयामि पूजयामि ॥

ॐ नर्यापसे नमः नर्यापसमावाहयामि

स्थापयामि पूजयामि ॥

ॐ पङ्क्तिराधसे नमः पङ्क्तिराधसमावाहयामि स्थापयामि पूजयामि ॥

ॐ विसर्पिणे नमः विसर्पिणमावाहयामि स्थापयामि पूजयामि ॥

ॐ सुगावोदेवाः सदनाऽअकर्मयऽआजग्मेद गूँ सवनञ्जुषाणाः । भरमाणाव्वहमानाहवी ꣳ ष्यस्मेधत्तव्वसवो व्वसूनि स्वाहा ॥ ॐ यज्ञपुरुषाय नमः यज्ञपुरुषमावाहयामि स्थापयामि पूजयामि ॥ इति कुण्डस्य समन्ततः पूजयेत्— ॐ आत्मनेनमः स्वशिरसि ॐ सर्वेभ्यः श्रीवैष्णवेभ्यो नमः । इति श्रीवैष्णवशिरस्सु पीताक्षतान्निक्षिपेत्—

# अथ ब्रह्मपूजनम्

अग्नेर्दक्षिणतो मण्डलोपरि सप्तदर्भनिर्मिते कूर्चे सशक्तिकं ब्रह्माणमावाह्यपूजयेत्—

ॐ आब्ब्रह्मन् ब्राह्मणो ब्रह्मवर्च्चसी जायतामाराष्ट्रे राजन्यः शूरऽइषव्योऽतिव्व्याधी महारथो जायतान्दोग्ध्रीर्धेनुर्व्वोढा नड्वानाशुः सप्प्तिः पुरन्धिर्य्योषा जिष्णूरथेष्ठाः सभेयोयुवास्य यजमानस्य व्वीरो जायतान्निकामे निकामे नः पर्ज्जन्यो व्वर्षतु फलवत्योनऽओषधयः पच्च्यन्ताम् य्योगक्षेमोनः कल्प्पताम् ॥

अथ ब्रह्मावाहनम्—

ॐ ब्रह्मयज्ञानं प्रथमम्पुरस्ताद्विसीमतः सुरुचोव्वेनऽआवः। सबुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्चव्विवः।

आवाहयाम्यहं देवं ब्रह्माणं परमेष्ठिनम्।
जगतोऽस्य समुपत्तिस्थितिसंहारकारणम्॥
आगच्छ भगवन् ब्रह्मन् यजमानसमृद्धये।
गन्धपुष्पादिभिः पूजां गृहाण जगदीश्वर॥

ॐ ब्रह्मणे नमः॥ ततः सर्वोपचारैः सम्पूज्य प्रणमेत्—

# अथासनविधानम्

होतुरासनम्— ॐ यस्य कूर्म्मो गृहेहविस्तमग्नेव्वर्द्धयात्वम्।
तस्म्मै देवाऽअधिव्ब्रुवन्नयञ्च ब्राह्मणस्पतिः॥

**अग्नेर्दक्षिणे ब्रह्मसमीपे यजमानासनम्—**

ॐ अग्ने प्रेहिप्प्रथमो देवयताञ्चक्षुर्देवानामुतमर्त्यानाम्। इयक्षमाणा भृगुभिः सजोंषाः सुवर्य्यन्तु यजमानाः स्वस्ति॥

**अग्नेरुत्तरतः प्रागग्रैः कुशैः प्रणीतासनं प्रणीताग्न्योर्मध्ये प्रोक्षण्यासनम् तत्र मन्त्रः—**

ॐ परीत्यभूतानि परीत्यलोकान् परीत्यसर्व्वाः प्रदिशो दिशश्च उपस्त्थायप्प्रथमजामृतस्स्यात्मनात्मान-मभिसंविवेश॥

## अथ प्रोक्षणीप्रणीते

**ततो द्वादशाङ्गुलदीर्घञ्चतुरङ्गुलविस्तारं चतुरङ्गुलखातं प्रणीता पात्रं वामहस्तेनादाय ब्रूयात्—**

ॐ इन्द्र आसान्नेता बृहस्पतिर्दक्षिणायज्ञः पुरऽएतुसोमः। देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम्।

**ततो दक्षिणहस्तेन प्रणीतापात्रे जलं प्रपूरयन् वक्ष्यमाणमन्त्रं पठेत्—**

ॐ उदुत्तमँव्वरुण पाशमस्मदवाधमं व्विमद्ध्यम ᳪ श्रथाय। अथावयमादित्यव्व्रतेतवानागसोऽअदितये स्याम॥

**ततो दक्षिणहस्तस्यानामिकया प्रणीतापात्रं स्पृशन् पठेत्—**

ॐ तत्वायामि ब्रह्मणाव्वन्दमानस्तदाशास्ते यजमानोहविर्ब्भिः। अहेडमानो व्वरुणेहवोद्धयुरुश ᳪ समानऽआयुः प्प्रमोषीः॥ **ततो**

**ब्रह्मणो मुखमवलोक्य प्रणीतापात्रमुत्तरासने स्थापयेत्–**

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् । ऊर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात् ॥ त्र्यम्बकं यजामहे सुगन्धिं पतिदेवनम् । ऊर्व्वारुकमिव बन्धनादितोमुक्षीय मामुतः ॥

**पवित्रद्वयं कुर्यात्–**

ॐ पवित्रेस्थोव्वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिम्भिः । देवीरापोऽअग्रेगुवोऽअग्रेपुवोग्रऽइम मद्ययज्ञन्नयताग्रे यज्ञपति ँ सुधातुं यज्ञपतिन्देवयुवम् ॥

## जलसंस्कारः

**ततो पात्राण्युत्तानानि कृत्वा द्वादशाङ्गुलदीर्घे करतलसम्मितखाते पद्मपत्राकृतौ कमलमुकुलाकृतौ वा उत्ताने प्रोक्षणीपात्रे जलं स्थापयेत् । तत्र मन्त्रः–**

ॐ इमं मे व्वरुण श्रुधीहवमद्या च मृडय । त्वामवस्युराचके ॥

**प्रादेशमात्रौ साग्रौ द्वौ दर्भौ पवित्रीकृत्यादिभरभ्युक्ष्य द्वे पवित्रे प्रोक्षणीपात्रे स्थापयेत्–**

ॐ देवस्यत्वा सवितुः प्रसवेश्शिवनोर्ब्बाहुभ्यां पूष्णो हस्ताभ्याम् । अग्नये जुष्टङ्गृह्णामि ।

**ततः प्रोक्षणीपात्रे पीताक्षतान्निक्षिप्य पवित्रान्तर्हिते प्रोक्षणीपात्रेऽपोनिनीयाग्नेर्दक्षिणात् समानीय मुखसममुद्धृत्य स्वस्य पुरतः स्थापयित्वा दक्षिणहस्ताङ्गुष्टकनिष्ठिकाभ्यामुदमग्रे पवित्रे गृहीत्वा ताभ्यां**

तदपः प्राक् त्रिरुत्पूय यज्ञपात्राणि त्रिः प्रोक्ष्य इद्ध्मविस्रस्य त्रिः प्रोक्ष्य परिस्तरणं कुर्यात्—

# अथ परिस्तरणम्

ॐ ये ते शतं व्वरुणं ये सहस्रं यज्ञियापाशाव्वितताममहान्तः। तेभिर्नोऽअद्यसवितो तद्विष्णुर्व्विश्श्वेमुञ्चन्तुमरुतः स्वर्काः स्वाहा। परिस्तरणप्रकारः यथा—कुशैराग्नेयादीशानान्तमुत्तराग्रंपरिस्तरेत् ब्रह्मणोऽग्नि पर्यन्तम्पूर्वाग्रं परिस्तरेदग्नितः प्रणीतापर्यन्तं पूर्वाग्रं परिस्तरणङ्कृत्वा पात्रासादनं कुर्यात्—

ॐ तत्वायामि ब्रह्मणावन्दमानस्तदाशास्ते यजमानोहविर्ब्भिः। अहेडमानोव्वरुणेहबोध्युरुश ᳪ समानऽआयुः प्प्रमोषीः॥ पवित्रार्थम् साग्रान्तर्गर्भयुतकुशत्रयग्रहणं कुर्यात्—

ॐ शादन्दद्भिरवकान्दन्तमूलैर्म्मृदं बर्स्वैस्तेगान्द ᳪ ष्ट्राब्भ्या ᳪसरस्वत्याऽअग्रजिह्वजिह्वायाऽउत्सादमवक्क्रन्देन तालु व्वाज ᳪ हनुब्भ्यामपऽआस्येन व्वृषणमाण्डाब्भ्यामादित्त्याँश्म्मश्रुभिः पन्थानं भ्रूब्भ्यान्द्यावा पृथिवीव्वर्तोब्भ्याम् विद्युतङ्कनीनकाब्भ्या ᳪ शुक्लाय स्वाहा कृष्णाय स्वाहा पार्य्याणि यक्ष्माण्यवार्य्याऽइक्षवो व्वार्य्याणि पक्ष्माणि पार्य्याऽइक्षवः॥ त्रयोदशोपयमनकुशान् गृह्णीयात्— ॐ उपयामगृहीतोस्यन्तर्य्यच्छमघवन्पाहि सोमम्। उरुष्य रायऽएषो यजस्व॥ यज्ञीयदारुमयपञ्चदशसमिधः पृथक्स्थापयेत्—

ॐ समिधाग्निन्दुवस्यत घृतैर्बोधयतातिथिम्। आस्मिन्हव्या जुहोतन॥ आज्यस्थाल्यामाज्यं चरुस्थाल्यां चरुञ्च निदध्यात्—

# आज्यसंस्कारः

ततोऽताम्रस्य धातोर्मृत्तिकाया वा द्वादशाङ्गुलविस्तृतायां प्रादेशोच्चपरिमितायामाज्यस्थाल्यां द्वे पवित्रे निधायाग्नेः पश्चिमतः स्थितायामाज्यस्थाल्यां पवित्रान्तर्हितायामाज्यं निरूप्यैशान्यामङ्गारेषु निधाय ज्वलता दर्भेणावद्योतनं कृत्वा द्वे दर्भाग्रे नखादन्येन छित्वा प्रक्ष्याल्याज्यपात्रे निधाय पुनरपि ज्वलतादर्भेण त्रिरग्निं परिक्रम्य दर्भमैशान्यां क्षिपेत्—

ॐ घृतवतीभुवनानामभिश्श्रियोर्व्वी पृत्थ्वीमधुदुघे सुपेशसा। द्यावा पृथिवीव्वरुणस्य धर्म्मणा विष्कभितेऽअजरे भूरिरेतसा । आज्यं वह्नेरवतार्याङ्गारानग्नौ क्षिप्त्वा सपवित्रेण हस्तेनाग्नेः प्रदक्षिणतः समानीय स्वस्य पुरतः स्थापयित्वा हस्तयोरङ्गुष्ठकनिष्ठिकाभ्यामुत्तराग्रे पवित्रे गृहीत्वाज्यं त्रिरुत्पूयापद्रव्यं निरस्य पवित्रग्रन्थिं विस्रस्याद्भिरभ्युक्ष्य प्रागग्रेपवित्रे वह्नौ प्रक्षिपेत्। आज्यमग्नेः प्रदक्षिणं कारयित्वा स्वस्य पुरतः स्थापयेत्—

ॐ तेजोसि शुक्रमस्यमृतमसि धामनामासि प्रियन्देवानामना धृष्टन्देवयजनमसि ॥ आज्यं निरीक्षणं कुर्यात्—

ॐ आपवस्व हिरण्यवदस्व व्वत्सोमवीरवत् । व्वाजङ्गोमन्तमाभर स्वाहा ॥ आज्यस्थाल्यां स्थिताभ्यां पवित्राभ्यामाज्यं त्रिरुत्पूय— ॐ प्रत्युष्ट ঁ रक्षः प्रत्युष्टाऽअरातयोनिष्टप्तঁरक्षो निष्टप्ताऽअरातयः । ऊर्व्वन्तरिक्षमन्वेमि। अपद्रव्येसति तन्निरीक्ष्य निस्सारणम्—

ॐ आत्वाहार्षमन्तरभूद्ध्रुवस्तिष्ठाव्विचाचलिः । विशस्त्वा सर्वावाञ्छन्तुमात्वद्राष्ट्रमधिभ्रसत् ॥ आज्ये पवित्रे निदध्यात्—

ॐ विष्णोरराटमसिव्विष्णोः श्नप्त्रेस्त्थो व्विष्ष्णोः स्यूरसि विष्ण्णोद्ध्रुवोसि। वैष्णवमसि विष्ष्णवेत्वा॥

## चरु[४] संस्कारः

**अष्टविधचरुषु यथासम्भवचरु चरुस्थाल्यां निरूप्य सम्प्रोक्ष्य ज्वलता दर्भेणा पर्यग्निकरणं कृत्वा वह्नेर्दक्षिणतःसमानीयाग्नेः पश्चिमतः कुशेषु निधाय कुशैराच्छाद्य पुरतः स्थापयेत्–**

ॐ पशुभिः पशूनाप्नोति पुरोडाशैर्हवी ६ ष्ष्या। छन्दोभिः सामिधेनीर्य्याज्ज्याभिर्वषट्कारान् ॥ ॐ अन्नपतेन्नस्य नोदेह्यनमीवस्यशुष्मिमणः । प्रप्रदातारन्तारिषऽऊर्ज्जन्नो धेहि द्विपदे शञ्चतुष्पदे॥ **एवं चरु अपि दक्षिणतःसमानीयाग्नेः प्रदक्षिणं कारयित्वा पुरतः संस्थाप्य सम्मार्जनकुशान् त्र्यधिकान् स्थापयेत्–**

ॐ घृताच्यसिजूहुर्नाम्ना सेदम्प्रियेणधाम्ना प्प्रिय ँ सदऽआसीद घृताच्यस्युपभृन्नाम्ना सेदम्प्रियेणधाम्नाप्प्रिय ँ सदऽआसीद घृताच्यसिद् ध्रुवानाम्नासेदम्प्रियेण धाम्नाप्प्रिय ँ सदऽआसीद प्रियेणधाम्नाप्रिय ँ सदऽआसीद । ध्रुवाऽअसदन्नृतस्ययोनौ ताव्विष्णोपाहिपाहियज्ञम्पाहि यज्ञपतिम्पाहि मां य्यज्ञन्न्यम्।

---

४ (दध्योदनं तिलान्नञ्च सर्पिः क्षीरन्तथैव च। केवलान्नं पायसान्नं मुद्गान्नञ्च गुडौदनम्॥ चरुरष्टविधः प्रोक्तोधर्मविद्भिः पुरातनैः)

# स्रुवसंस्कारः

**स्रुवमग्नौ प्रतप्य दर्भाग्रैः स्रुवाग्रं दर्भमूलैः स्रुवमूलं दर्भमध्यैः स्रुवमध्यं सर्वतः स्रुवबिलं सम्मृज्यात् पुनः प्रतप्य सम्प्रोक्ष्याग्नेरुत्तरतः कुशेषु स्थापयित्वा स्रुचश्चमेति श्रुवग्रहणङ्कुर्यात्–**

ॐ स्रुचश्चमे चमसाश्चमे व्वायव्व्यानि चमे द्रोणकलशश्चमे ग्ग्रावाणश्चमे धिषवणे च मे पूतभृच्चमऽआधवनीयश्चमे वेदिश्च मे बर्हिश्चमे वभृथश्चमेस्वगाकारश्चमे यज्ञेन कल्पन्ताम्।

**सम्मार्जनकुशैः प्रणीतोदकेन श्रुवप्रोक्षणं कुर्यात् तत्रायं क्रमः अग्रेणाग्रं मध्येन मध्यं मूलेन मूलं तत्र मन्त्रः–**

ॐ प्रत्युष्ट ँ रक्षः प्प्रत्युष्टाऽअरातयो निष्टप्त ँ रक्षो निष्टप्ताऽअरातयः। उर्व्वन्तरिक्षमन्व्वेमि।

**दर्भैः श्रुवसम्मार्जनम्–**

ॐ अनिशितोसि सपत्क्नक्षिद्वाजिनन्त्वाव्वाजेद्ध्यायै सम्मार्ज्मि।

**वह्नौ श्रुवप्रतपनम्–**

ॐ पुनन्तु मादेवजनाः पुनन्तु मनसा धियः। पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा॥

**प्रणीतोदकेन श्रुवमभिषिञ्चेत्–**

ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये। शंय्योरभि स्रवंतुनः।

**पुनः श्रुवं प्रतपेत्–**

ॐ तत्वायामि ब्ब्रह्मणा व्वन्दमानस्तदासास्ते यजमानो हविर्ब्भिः। अहेडमानो वरुणेहवोद्ध्युरुश ँ समानऽआयुः प्प्रमोषीः॥

**अग्नेरुत्तरतः कुशेषु श्रुवमुदङ्मुखं निदध्यात्–**

ॐ तमुत्त्वादध्यङ्ङृषिःपुत्रऽईधेऽअथर्वणः । वृत्रहणं पुरन्दरम् ॥

**प्रोक्षणीपात्रस्थपवित्राभ्यां प्रणीतोदकेनासादितवस्तुसेचनम्–**

ॐ देवस्यत्वा सवितुः प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्। पूष्णो हस्ताभ्याम्। अग्नीषोमाब्भ्यान्त्वा–जुष्टन्नियुनज्ज्मि। अद्भ्यस्त्वौष धीब्भ्योनुत्वामाता–मन्यतामनुपितानु ब्भ्रातासर्गब्भ्योनुसखासयूत्थ्यः। अग्निषोमाभ्यान्त्वाजुष्टम्प्रोक्षामि॥

**ज्वलत्तृणादिकं चरोराज्यस्याग्नेश्चोपरि प्रदक्षिणक्रमेण भ्रामयित्वाग्नौ क्षिपेत्–**

ॐ धृष्टिरस्यपाग्गनेऽअग्गिनमामादञ्जहि निष्क्रब्ब्याद ँ सेधादेवयजं वह। ध्रुवमसिपृथिवीन्दृ ँ ह ब्रह्मवनित्वाक्षत्रवनि सजातवन्युपदधामिब्भ्रातृव्यस्यव्वधाय॥

## पूर्णपात्रसंस्कारः

**द्वे पवित्रे पूर्णपात्रे निधाय कनिष्ठिकाङ्गुष्ठाभ्यां पूर्णपात्रं प्राक् त्रिरुत्पूयाग्नेः दक्षिणतः पूर्णपात्रं समानीय मुखसममुद्धृत्य ब्रह्मणः समीपे स्थापयित्वा कुशैराच्छाद्य चरुं ब्रह्मणे समर्पयेत्–**

ॐ आप्यायस्व समेतुते विश्वतः सोमव्वृष्ण्यम्। भवा–वाजस्य संगथे॥ **ततोऽग्नेर्विनियोगपूर्वकप्रार्थनम् –**

चत्वारीत्यस्य वामदेवऋषिः त्रिष्टुप् छन्दो यज्ञपुरुषवैश्वानरः परमात्मा देवता अग्निप्रार्थने विनियोगः ।

ॐ चत्वारिश्रृङ्गास्त्रयोऽअस्यपादा द्वेशीर्षेसप्तहस्तासोऽअस्य।
त्रिधाबद्धोवृषभोरोरवीति महो देवोमर्त्यां २ऽआविवेश ॥

अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ।
सुवर्णवर्णममलं समिद्धं सर्वतोमुखम् ॥
पावकं द्विजरूपञ्च त्रिनेत्रञ्च चतुर्भुजम् ।
त्रिशिखं सप्तजिह्वञ्च पञ्चलक्षणसंयुतम् ॥
त्रिभागन्तु मुखं तस्य ह्यधिकं वक्त्रमुच्यते ।
उत्तरास्ये स्थितो विष्णुर्दक्षिणास्ये प्रजापतिः ॥
मध्यवक्त्रे तु चेशान एवं ब्रह्मप्रभाषितम् ।
मूर्ध्नि चैवत्वहं ब्रह्मा मुखे चैव तु शंकरः ॥
जिह्वायां संस्थितो विष्णुर्दंष्ट्रायां च ग्रहाः स्मृताः ।
नासायां देवताः सर्वाश्चक्षुषीन्दुदिवाकरौ ॥
ऋग्वेदो हृदयस्थाने बाह्वङ्गल्योर्यजुस्तथा ।
उदरे कटिगुह्ये च सामवेदः प्रकीर्त्तितः ॥
अथर्वो जङ्घपादे च ग्रीवायां प्रणवस्तथा ।
पृष्ठे चैव तु गायत्री एवं स्यात्तु षडङ्गकम् ॥

इति वैश्वानरलक्षणम्—

त्रिशिखं च चक्रधरं साक्षसूत्रकमण्डलुम्।
व्याघ्रहस्तं तथा पुष्प गन्धाभरणभूषितम्॥
अजास्कन्ध समारूढं कृष्णाजिनोत्तरीयकम्।
ऋग्यजुः सामवेदानामथर्वध्वनिभूषितम्।
होमार्थं प्रार्थयेऽहं त्वां चर्वाज्याभ्यां हुताशनम्।
ओममुकवैश्वानर दिव्यरूपावाहितो भव।
तावत् तिष्ठात्र मे ब्रह्मन् यावत्कर्म समाप्यते॥
स्वाहा स्वधा सहितायाग्नयेऽमुकाय नमः। **इत्यावाहयेत्—**

## परिस्तरणम्

**पूर्वदक्षिणपश्चिमोत्तरदिशि क्रमेणाग्रिममन्त्रैःकुशैः परिस्तरणं कुर्यात्—**

ॐ अग्निमीडेपुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्॥

ॐ इषेत्वोर्जेत्वा वायवस्थदेवोवः सवितापार्प्रयतुश्श्रेष्ठतमाय कर्म्मणऽआप्यायदध्वमघ्न्याऽइन्द्राय भागं प्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽईशतमाघस ॐ सोद्धुवाऽअस्मिन्गोपतौ स्यातबह्वीर्य्यजमानस्य पशून्पाहि।

ॐ अग्नऽआयाहिवीतयेगृणानोहव्यदातये। निहोतासत्सि बर्हिषि।

ॐ शन्नोदेवीरभिष्टयऽआपो भवन्तु पीतये। शंयोरभि स्रवन्तुनः॥

# अथपरिधिः

अथ परिस्तरणोपरि स्थविष्ठमुत्तराग्रं यज्ञीयदारुमयं कनिष्ठिकामध्यमाङ्गुष्ठस्थूलं कुण्डायामं परिधित्रयं परिदध्यात्। उत्तराग्रं परिधिमग्नेः पश्चिमतो निधाय, दक्षिणतोऽणीयांसं परिधिं पूर्वाग्रं निधाय, उत्तरतो निहितमुत्तराग्रं मध्यमं परिधिं हस्तेनोपस्पृश्याग्नेःपूर्वतो दक्षिणोत्तर क्रमेण प्रागग्रे द्वे चाधारसमिधे निदध्यात्। ततः परिस्तरणोपरिप्रणीतापात्रस्थ जलेन परिषेचनङ्कुर्यात्–

ॐ अदिते अनुमन्यस्व इत्यग्ने र्दक्षिणतः प्रागग्रां जलधारां दद्यात्।

ॐ अनुमते अनुमन्यस्व इति पश्चिमत उत्तराग्रां जलधारां दद्यात्।

ॐ सरस्वते अनुमन्यस्व इत्युत्तरतः प्रागग्रां जलधारां दद्यात्॥

ॐ देवसवितः प्रसुवः इति अग्नेः समन्ततो जलधारां दद्यात्॥

# अथेध्माधानम्

एवं तत्र स्थापितान् सर्वान् देवान् सम्पूज्य, ततोऽग्निं प्रज्वाल्य पञ्चदशसमिध आज्येनाभ्यज्य पुष्पाक्षतैरभ्यर्च्य स्वमलङ्कृत्य अस्मिन् होमकर्मणि ब्रह्मन्निध्म आधास्ये इत्युक्त्वा आधत्स्वेत्यनुज्ञात उपयमनकुशान् वामहस्ते कृत्वोत्तिष्ठन् प्रजापतिं मनसाध्यायन् तूष्णीं प्रज्वलितेऽग्नौ घृताक्ताः पञ्चदशसमिधोजुहुयात्। ततः श्रुवेणाज्यमादाय–

ॐ प्रजापतये स्वाहा इति नैर्ऋत्यादीशानान्तं जुहुयात् प्रजापतय इदं न मम इति प्रणीतायां संस्रवं निनयेत्।

ॐ इन्द्राय स्वाहा इति वायव्यादाग्नेयान्तं जुहुयात् इन्द्राय इदं न मम इति प्रणीतायां संस्रवं निनयेत्।

ॐ अग्नये स्वाहा इत्यग्नेर्दक्षिणतो जुहुयात् अग्नये इदं न मम इति प्रणीतायां संस्रवं निनयेत्।

ॐ सोमाय स्वाहा इत्यग्नेरुत्तरतो जुहुयात् सोमाय इदं न मम इति प्रणीतायां संस्रवं निनयेत्।

## अथाग्नेर्जिह्वानामभिर्होमः

ईशाने- ॐ प्रभायै स्वाहा। पूर्वस्मिन्- ॐ दीप्त्यै स्वाहा।

आग्नेये- ॐ प्रकाशायै स्वाहा। नैर्ऋत्ये- ॐ मरीच्यै स्वाहा।

पश्चिमे-ॐ तापिन्यै स्वाहा। वायव्ये- ॐ करालायै स्वाहा।

उत्तरे- ॐ लेलिहायै स्वाहा। याम्ये, ॐ लेलिहायै स्वाहा।

मध्ये च ॐ लेलिहायै स्वाहा इति जुहुयात्।

**ततः पुष्पाञ्जलिमादाय प्रार्थयेत्-**

द्विशीर्षकं सप्तहस्तं त्रिपादं सप्तजिह्वकम्।
वरदं शक्तिपाणिञ्च बिभ्राणं स्रुक्स्रुवौ तथा॥
स्वाहाञ्च दक्षिणे पार्श्वे वामे देवी स्वधान्तथा।
रक्तमाल्याम्बरधरमेवमग्निं विचिन्तयेत्॥ इति॥

# अथपञ्चवारुणिहोमः

**ॐ प्रजापतय इति प्रजापति ऋषिस्त्रिष्टुप्छन्दः, प्रजापतिर्देवता आज्यहोमे विनियोगः।**

ॐ प्रजापतये स्वाहा। इत्यग्नावाज्यं हुत्वा इदं प्रजापतये न मम। इति हुतशेषं प्रोक्षणीपात्रे प्रक्षिपेत्। एवमग्रेऽपि सर्वत्र कुर्यात्।

**ॐ इन्द्रायेति प्रजापति ऋषिस्त्रिष्टुप्छन्द इन्द्रो देवता आज्यहोमे विनियोगः।**

ॐ इन्द्राय स्वाहा। इदमिन्द्राय न मम,

**ॐ अग्नय इति प्रजापति ऋषिस्त्रिष्टुप्छन्दोग्निर्देवता आज्यंहोमे विनियोगः।**

ॐ अग्नये स्वाहा। इदमग्नये न मम प्रोक्षणी पात्रेपि। एवमग्रेऽपि

**ॐ सोमायेति प्रजापतिऋषिःत्रिष्टुप्छन्दःसोमोदेवता आज्यहोमे विनियोगः।**

ॐ सोमाय स्वाहा। सोमाय इदं न मम प्रोक्षणी पात्रे।

**ॐ महाव्याहृतीनां प्रजापतिऋषि अग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुप्छन्दांस्यग्न्याधाने विनियोगः॥**

ॐ भूः स्वाहा। इदमग्नये न मम।ॐ भुवः स्वाहा। इदं वायवे न मम। ॐ स्वः स्वाहा। इदं सूर्याय न मम।

**ॐ त्वन्नो अग्न इतिवामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्द आज्यहोमेविनियोगः।**

ॐ त्वन्नोऽअग्नेव्वरुणस्य व्विद्वान्देवस्य हेडोऽअवयासि सीष्ठाः। यजिष्ठोवह्नितमः शोशुचानोव्विश्वाद्वेषा ꣳ सि प्प्रमुमुग्ध्यस्मत्॥ ॐ अग्नीवरुणाभ्यां स्वाहा। अग्नीवरुणाभ्याम् इदं न मम।

**ॐ सत्वन्नो अग्न इति वामदेवऋषिः त्रिष्टुप्छन्दो अग्निवरुणौ देवते आज्यहोमे विनियोगः।**

ॐ सत्वन्नोऽअग्ने व्वमोभवोतीनेदिष्टोऽअस्याऽउषसो व्युष्टौ। अवयक्ष्वनो व्वरुण ꣳ रराणोव्वीहिमृडीक ꣳ सुहवोनऽएधि॥

ॐ अग्निवरुणाभ्यां स्वाहा। अग्निवरुणाभ्याम् इदं न मम॥

**ॐ अयाश्चाग्न इति वामदेवऋषिः त्रिष्टुप्छन्दोऽग्निर्देवता सर्वप्रायश्चित्तहोमे विनियोगः।**

ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्वमित्व मयाऽअसि। अयानो यज्ञं वहास्यहानो धेहि भेषज ꣳ स्वाहा॥ ॐ अग्नये स्वाहा अग्नये इदन्न मम।

**ॐ ये ते शतमिति वामदेवऋषिःत्रिष्टुप्छन्दो वरुण सवितृ विष्णुविश्वेदेवमरुत्स्वर्कदेवताः प्रायश्चित्तहोमे विनियोगः।**

ॐ ये ते शतं व्वरुणं ये सहस्रं यज्ञिया पाशावितता महान्तः। तेभिर्नोऽअद्य सवितोत तद्विष्णुर्विश्वेमुञ्चन्तु मरुतः स्वर्क्काः॥

ॐ वरुणाय स्वाहा सवित्रे स्वाहा विष्णवे स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा मरुद्भ्यः स्वाहा स्वर्केभ्यः स्वाहा इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यो न मम।

**ॐ उदुत्तममिति शुनशेपऋषिः त्रिष्टुप्छन्दो वरुणो देवता पाशान्मोचने विनियोगः।**

ॐ उदुत्तमं व्वरुणपाशमस्म्मदवाधमं व्विमद्ध्यम ँ श्श्रथाय। अथाव्वयमादित्त्यव्व्रते तवानागसोऽअदितयेस्याम॥ ॐ वरुणाय स्वाहा। वरुणाय इदं न मम। **इति पञ्चवारुणीहोमं कृत्वा मूलमन्त्रेणाष्टोत्तरशताहुतीर्हुत्वा पुरुषसूक्तेन जुहुयात्—**

# अथ पुरुषसूक्तम्

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। सभूमि ँ सर्व्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम्॥ ॐ पुरुषाय नारायणाय नमः स्वाहा।

ॐ पुरुषऽएवेद गूं सर्वं यद्भूतं यच्चभाव्व्यम्। उतामृतत्व स्येशानो यदन्नेनातिरोहति॥ ॐ पुरुषाय नारायणाय नमः स्वाहा।

ॐ एतावानस्य महिमातोज्ज्यायाँश्च पूरुषः। पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि॥ ॐ पुरुषाय नारायणाय नमः स्वाहा।

ॐ त्रिपादूदर्ध्वऽउदैत्पुरुषः पादोऽस्येहाभवत्पुनः । ततो व्विष्ष्वङ्व्व्यक्क्रामत्साशनानशनेऽअभि ॥ ॐ पुरुषाय नारायणाय नमः स्वाहा।

ॐ ततो व्विराडजायत व्विराजोऽअधिपूरुषः । सजातोऽअत्यरिच्च्यतपश्चाद्भूमिमथोपुरः ॥ ॐ पुरुषाय नारायणाय नमः स्वाहा।

ॐ तस्माद्यज्ञात्सर्व्वहुतः सम्भृतं पृषदाज्यम् । पशूस्ताँश्चक्रे व्वायव्व्यानारण्याग्ग्राम्याश्च ये॥ ॐ पुरुषाय नारायणाय नमः स्वाहा।

ॐ तस्माद्यज्ञात्सर्व्वहुतऽऋचः सामानि जज्ञिरे । छन्दा ꣳ सि जज्ञिरे तस्म्माद्यजुस्तमादजायत॥ ॐ पुरुषाय नारायणाय नमः स्वाहा।

ॐ तस्म्मादश्श्वाऽअजायन्त ये के चोभयादतः । गावोह जज्ञिरे तस्म्मात्तस्म्माज्जाताऽअजावयः॥ ॐ पुरुषाय नारायणाय नमः स्वाहा।

ॐ तं यज्ञं बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्ग्रतः। तेन देवाऽअयजन्त साद्ध्याऽऋषयश्च ये ॥ ॐ पुरुषाय नारायणाय नमः स्वाहा।

ॐ यत्पुरुषं व्यदधुः कतिधाव्यकल्पयन्। मुखङ्किमस्स्यासीत्किं बाहू किमूरूपादाऽउच्येते॥ ॐ पुरुषाय नारायणाय नमः स्वाहा।

ॐ ब्राह्मणोऽस्यमुखमासीद्बाहूराजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्या ꣳ शूद्रोऽअजायत ॥ ॐ पुरुषाय नारायणाय नमः स्वाहा।

ॐ चन्द्रमामनसोजातश्चक्षोःसूर्यो अजायत । श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ ॐ पुरुषाय नारायणाय नमः स्वाहा।

ॐ नाभ्याऽआसीदन्तरिक्ष ँ शीर्ष्णो द्यौः समवर्त्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ऽअकल्पयन् ॥ ॐ पुरुषाय नारायणाय नमः स्वाहा।

ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत। व्वसन्तो स्यासीदाज्ज्यं ग्रीष्मऽइध्मः शरद्धविः ॥ ॐ पुरुषाय नारायणाय नमः स्वाहा।

ॐ सप्तास्स्यासन् परिधयस्त्रिः सप्तसमिधः कृताः । देवा यद्यज्ञन्तन्वानाऽअबध्नन् पुरुषं पशुम् ॥ ॐ पुरुषाय नारायणाय नमः स्वाहा।

ॐ यज्ञेन यज्ञमयजन्तदेवास्तानिधर्म्माणि प्रथमान्यासन् । तेहनाकम्महिमानः सचन्त यत्र पूर्वेसाध्याः सन्तिदेवाः ॥ ॐ पुरुषाय नारायणाय नमः स्वाहा।

ॐ अद्भ्यः सम्भृतः पृथिव्व्यै रसाच्चविश्वकर्म्मणः समवर्तताग्ग्रे तस्स्य त्वष्टा व्विदधद्रूपमेति तन्मर्त्यस्य देवत्त्वमाजानमग्ग्रे ॥ ॐ पुरुषाय नारायणाय नमः स्वाहा।

ॐ वेदाहमेतं पुरुषम्महान्तमादित्यवर्णन्तमसःपरस्तात् । तमेवव्विदित्वातिमृत्युमेतिनान्न्यःपन्थाव्विद्यतेऽयनाय॥ॐ पुरुषाय नारायणाय नमः स्वाहा।

ॐ प्रजापतिश्चरतिगर्ब्भेऽअन्तरजायमानोबहुधा विजायते। तस्य योनिम्परिपश्यन्तिधीरास्तस्मिन् हतस्त्थुर्भुवनानि विश्वा ॥ ॐ पुरुषाय नारायणाय नमः स्वाहा।

ॐ यो देवेभ्यऽआतपति यो देवानां पुरोहितः। पूर्व्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये॥ ॐ पुरुषाय नारायणाय नमः स्वाहा।

ॐ रुचं ब्राह्मञ्जनयन्तो देवाऽअग्ग्रे तदब्ब्रुवन्। यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवाऽअसन्वशे॥ ॐ पुरुषाय नारायणाय नमः स्वाहा।

ॐ श्रीश्चते लक्ष्मीश्चपत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौव्यात्तम् । इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्म ऽइषाण। ॐ पुरुषाय नारायणाय नमः स्वाहा।

## अथ विष्णुसूक्तम्

ॐ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममेरजा ँ सि। योऽअस्कभायदुत्तर ँ सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णवे त्वा। ॐ विष्णवे नमः स्वाहा।

ॐ विष्णोरराटमसि व्विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्द्ध्रुवोऽसि। वैष्णवमसि विष्णवे त्वा॥ ॐ विष्णवे नमः स्वाहा।

ॐ तदस्य प्रियमभिपाथोऽअस्यां नरोयत्रदेवयवोमदन्ति । उरुक्रमस्य सहिबन्धुरित्था विष्णोः पदे परमे मध्वऽउत्सः॥

ॐ विष्णवे नमः स्वाहा।

ॐ प्रतद्विष्णुस्तवते वीर्येण मृगोनभीमः कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा॥ ॐ विष्णवे नमः स्वाहा।

ॐ परो मात्रया तनुवावृधान न ते महित्वमन्वश्नुवन्ति। उभे ते विद्मरजसी पृथिव्याविष्णोर्देवत्वं परमस्यवित्से॥

ॐ विष्णवे नमः स्वाहा।

ॐ विचक्रमेपृथिवीमेषऽएतां क्षेत्रायविष्णुर्मनुषेदशस्यन् । ध्रुवासोऽअस्यकीरयोजनासऽउरुक्षिति ँ सुजनिमाचकार ॥

ॐ विष्णवे नमः स्वाहा।

ॐ त्रिर्देवः पृथिवीमेषऽएतां विचक्रमेशतवर्चसं महित्वा । प्रविष्णुरस्तुतवस्तवीयान्त्वेष ँ ह्यस्यस्थविरस्यनाम ॥

ॐ विष्णवे नमः स्वाहा।

ॐ अतो देवाऽअवन्तुनो यतो विष्णुर्विचक्रमे । पृथिव्याः सप्तधामभिः ॥ ॐ विष्णवे नमः स्वाहा।

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्यपा ँ सुरे स्वाहा। ॐ विष्णवे नमः स्वाहा।

ॐ त्रीणि पदा विचक्रमे विष्णुर्गोपाऽअदाभ्यः । अतो धर्माणि धारयन् ॥ ॐ विष्णवे नमः स्वाहा।

ॐ विष्णोः कर्माणि पश्यत यतो व्रतानि पशपशे। इन्द्रस्य युज्यः सखा ॥ ॐ विष्णवे नमः स्वाहा।

ॐ तद्विष्णोः परमं पद ँ सदा पश्यन्ति सूरयः ।

दिवीव चक्षुराततम् ॥ ॐ विष्णवे नमः स्वाहा।

ॐ तद्विप्रासो विपन्यवो जागृवा ँ सः समिन्धते ।

विष्णोर्यत् परमं पदम् ॥ ॐ विष्णवे नमः स्वाहा।

# अथ श्रीसूक्तम्

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।

चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥ ॐ श्रीं श्रियै नमः स्वाहा ।

ॐ ताम्मऽआवह जातवेदो लक्ष्मीमनपगामिनीम् ।

यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ ॐ श्रीं श्रियै नमः स्वाहा ।

ॐ अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ।

श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥ ॐ श्रीं श्रियै नमः स्वाहा ।

ॐ कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मे स्थिताम्पद्मवर्णां तामिहोपह्वये श्रियम् ॥

ॐ श्रीं श्रियै नमः स्वाहा ।

ॐ चन्द्राम्प्रभासां यशसाज्वलन्तीं श्रियं लोकेदेवजुष्टामुदाराम् ।
तां पद्मनेमीं शरणमहं प्रपद्येऽअलक्ष्मीर्मे नश्यतां त्वा वृणे ॥

ॐ श्रीं श्रियै नमः स्वाहा ।

ॐ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथबिल्वः ।
तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्याऽअलक्ष्मीः ॥

ॐ श्रीं श्रियै नमः स्वाहा ।

ॐ उपैतुमां देवसखः कीर्तिश्चमणिना सह ।

प्रादुर्भूतोस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥

ॐ श्रीं श्रियै नमः स्वाहा ।

ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिञ्च सर्वान्निर्णुद मे गृहात् ॥ ॐ श्रीं श्रियै नमः स्वाहा ।
ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्व भूतानां तामिहोपह्वये श्रियम् ॥
ॐ श्रीं श्रियै नमः स्वाहा ।
ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥
ॐ श्रीं श्रियै नमः स्वाहा ।
ॐ कर्दमेन प्रजाभूता मयि सम्भव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥ ॐ श्रीं श्रियै नमः स्वाहा ।
ॐ आपः सृजन्तुस्निग्धानि चिक्लीत वस मे गृहे ।
नीच देवीम्मातर ँ श्रियं वासय मे कुले ॥ ॐ श्रीं श्रियै नमः स्वाहा ।
ॐ आर्द्राम्पुष्करिणीम्पुष्टिं पिङ्गलाम्पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो मऽआवह ॥
ॐ श्रीं श्रियै नमः स्वाहा ।
ॐ आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम् ।
सूर्यांहिरण्मयीं लक्ष्मीं जातवेदो मऽआवह ॥ ॐ श्रीं श्रियै नमः स्वाहा ।
ॐ ताम्मऽआवह जातवेदो लक्ष्मीमनपगामिनीम् ।

यस्यां हिरण्यं प्रभूतं गावोदास्योऽश्वान् विन्देयं पुरुषानहम् ॥

ॐ श्रीं श्रियै नमः स्वाहा।

(ॐ य इच्छेद्वरदां देवीं श्रियं नित्यं कुले स्थितां)।

य शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम्।

श्रियः पञ्चदशर्चञ्च श्रीकामः सततं जपेत् ॥

ॐ श्रीं श्रियै नमः स्वाहा।

ॐ पद्मानने पद्मऊरु पद्माक्षि पद्मसंभवे।

तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहम् ॥

ॐ श्रीं श्रियै नमः स्वाहा।

ॐ अश्वदायी गोदायी धनदायी महाधने।

धनं मे जुषतां देवि सर्वकामांश्च देहि मे ॥ ॐ श्रीं श्रियै नमः स्वाहा।

ॐ पद्माननेपद्मिनिपद्मपत्रे पद्मप्रियेपद्मदलायताक्षि।

विश्वप्रियेविश्वमनोऽनुकूले ! त्वत्पादपद्मम्मयिसन्निधत्स्व ॥

ॐ श्रीं श्रियै नमः स्वाहा।

ॐ पुत्रपौत्रधनं धान्यं हस्त्यश्वादिगवेरथम्।

प्रजानां भवसि माता आयुष्मन्तं करोतु माम् ॥

ॐ श्रीं श्रियै नमः स्वाहा।

ॐ धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः।

धनमिन्द्रो बृहस्पतिर्वरुणं धनमस्तुमे ॥ ॐ श्रीं श्रियै नमः स्वाहा।

ॐ वैनतेय सोमं पिबसोमं पिबतु वृत्रहा।

सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः॥

ॐ श्रीं श्रियै नमः स्वाहा।

ॐ न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः।

भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत्॥

ॐ श्रीं श्रियै नमः स्वाहा।

ॐ सरसिजनिलये सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे। भगवति हरिवल्लभे मनोज्ञे त्रिभुवन भूतिकरि प्रसीद मह्यम्॥

ॐ श्रीं श्रियै नमः स्वाहा।

ॐ विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम्।विष्णोः प्रियसखीं देवीं नमाम्यच्युत वल्लभाम्॥ ॐ श्रीं श्रियै नमः स्वाहा।

ॐ महालक्ष्म्यै च विद्महे, विष्णुपत्न्यै च धीमहि। तन्नो लक्ष्मीः प्रचोदयात्॥ ॐ श्रीं श्रियै नमः स्वाहा।

ॐ श्रीर्वर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानं महीयते। धनं धान्यम्पशुम्बहुपुत्रलाभं शतसम्वत्सरं दीर्घमायुः॥

ॐ श्रीं श्रियै नमः स्वाहा।

# अथ भूसूक्तम्

ॐ भूमिर्भूम्ना द्यौर्वरिणान्तरिक्षं महित्वा।
उपस्थे ते देव्यदितेग्निमन्नादमन्नाद्याया दधे॥
ॐ भूं भूदेव्यै नमः स्वाहा॥

ॐ आयङ्गौः पृश्निरक्रमीदसनन्मातरं पुनः।
पितरं च प्रयन्त्सुवः॥
ॐ भूं भूदेव्यै नमः स्वाहा॥

ॐ त्रिꣳसद्धाम विराजति वाक्पतङ्गाय शिश्रिये।
प्रत्यस्य वहद्युभिः॥
ॐ भूं भूदेव्यै नमः स्वाहा॥

ॐ अस्य प्राणादपानत्यन्तश्चरति रोचना।
व्यख्यन्महिषः सुवः॥
ॐ भूं भूदेव्यै नमः स्वाहा॥

ॐ यत्वा क्रुद्धः परोवपमन्युना यदवर्त्या।
सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि॥
ॐ भूं भूदेव्यै नमः स्वाहा॥

ॐ यत्ते मन्युपरोप्तस्य पृथिवीमनुदद्ध्वसे।
आदित्या विश्वे तद्देवा वसवश्च समाभरन्॥
ॐ भूं भूदेव्यै नमः स्वाहा॥

ॐ मेदिनी देवी वसुन्धरा स्याद्वसुधा देवी वासवी।
ब्रह्मवर्चसः पितृणां श्रोत्रं चक्षुर्मनः॥
ॐ भूं भूदेव्यै नमः स्वाहा॥

ॐ देवी हिरण्यगर्भिणी देवी प्रसूवरी सदने सत्यायने सीद ॥
ॐ भूं भूदेव्यै नमः स्वाहा ॥

ॐ समुद्रवती सावित्री हनो देवी मह्यङ्गी ।
महो धरणी महो व्यतिष्ठा शृङ्गे शृङ्गे यज्ञे यज्ञे विभीषिणी ॥
ॐ भूं भूदेव्यै नमः स्वाहा ॥

ॐ इन्द्रपत्नी व्यापिनी सुरसरिदिह वायुमती जलशयनी ।
श्रियंधाराजा सत्यन्तोपरि मेदिनी श्वोपरि धत्तङ्गाय ॥
ॐ भूं भूदेव्यै नमः स्वाहा ॥

ॐ विष्णुपत्नीं महीं देवीं माधवीं माधवप्रियाम् ।
लक्ष्मीप्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥
ॐ भूं भूदेव्यै नमः स्वाहा ॥

ॐ धनुर्धरायै विद्महे सर्वसिद्ध्यै च धीमहि ।
तन्नो धरा प्रचोदयात् ॥
ॐ भूं भूदेव्यै नमः स्वाहा ॥

## अथ नीलासूक्तम्

श्रृण्वन्ति श्रोणाममृतस्यगोपा पुण्यामस्याऽउपश्रृणोपि वाचम् ।
महीं देवीं विष्णुपत्नीमजूर्या प्रतीचीमेनां हविष यजामः ॥
ॐ नीं नीलादेव्यै नमः स्वाहा ।

ॐ त्रेधा विष्णुरुरुगायो विचक्क्रमे महीं दिवं पृथिवीमन्तरिक्षम् ।
तच्छ्रोणैतिश्रवऽइच्छमानापुण्यं लोकं यमानाय कृण्वती ॥
ॐ नीं नीलादेव्यै नमः स्वाहा ।

ॐ गृणाहि घृतवतीसवितराधिपत्यै पयस्वतीरन्तिराशानोऽअस्तु।
ध्रुवादिशां विष्णुपत्न्यघोराऽऽस्येशाना सहसो यामनोतौ ॥

ॐ नीं नीलादेव्यै नमः स्वाहा।

ॐ बृहस्पतिर्मातरिश्वोत वायुः सन्धुवाना वाताऽअभिनोगृणन्तु।
विष्टम्भो दिवोधरुणः पृथिव्याऽअस्येशाना जगतो विष्णुपत्नी ॥

ॐ नीं नीलादेव्यै नमः स्वाहा।

ॐ महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि।
तन्नो नीला प्रचोदयात् ॥

ॐ नीं नीलादेव्यै नमः स्वाहा।

## अथ मध्यमहोमः

**तत्तत्कर्मणां विशेषहोमश्चेत् तं कुर्यात् स एव मध्यमहोम इत्युच्यते। यथा भागवतसप्ताहस्य होमः। मन्त्रपुरश्चरणादीनां होमः, तत्र शक्तश्चेत् विष्णुसहस्रनामभिश्च जुहुयात्—**

## अथोत्तरहोमः

ॐ वाचस्पतिं विश्वकर्म्माणमूतये मनोजुवंवाजेऽअद्या हुवेम। सनो विश्वानि हवनानि जोषद्विश्वशंभूरवसे साधुकर्मा।

ॐ सायुधाय सशक्तिकाय सपरिवाराय श्रीमते विष्वक्सेनाय नमः स्वाहा।

ॐ देवासो येन विधृतेन बाहुना सुदर्शनेन प्रयतास्तमायन्। येनाङ्किता मनवो लोकसृष्टिं वितन्वन्ति ब्राह्मणास्तद्वहन्ति ॥

ॐ सायुधाय सशक्तिकाय सपरिवाराय सुदर्शनाय नमः स्वाहा।

ॐ शेषंनुतऽइन्द्र सस्मिन्योनौ प्रशस्तये पवीरमस्यमह्ना। सृजदर्णां स्यवयधुधागास्तिष्ठद्धरी धृषता मृष्टवाजान्॥

ॐ सायुधाय सशक्तिकाय सपरिवाराय शेषाय नमः स्वाहा।

ॐ कि ँ स्विद्वनंकऽउस वृक्षऽआसयतो द्यावापृथिवी निष्टतक्षुः। मनीषिणो मनसा पृच्छतेदुतद्यदद्ध्यतिष्ठद्विश्वाभुवनानि धारयन्॥

ॐ सायुधाय सशक्तिकाय सपरिवाराय अनन्ताय नमः स्वाहा।

ॐ सुपर्णं विप्रा कवयो वचोभिरेकं सन्तं बहुधा कल्पयन्ति

छन्दा ँ सि च दधतोऽअध्वरेषु ग्रहान् सोमस्य मिमते द्वादश।

ॐ सायुधाय सशक्तिकाय सपरिवाराय गरुडाय नमः स्वाहा।

ॐ यज्ञेन यज्ञमयजन्तदेवास्तानि धर्म्माणि प्रथमान्यासन्। तेहनाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥

ॐ साध्येभ्यो नमः स्वाहा॥

ॐ स्वादुष ँ सदःपितरोव्वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः। चित्रसेनाऽइषुवलाऽअमृद्ध्राः सतोवीराऽउरव्वोव्व्रातसाहाः॥

ॐ सायुधाय सशक्तिकाय सपरिवाराय हेतये नमः स्वाहा।

# अथ चतुर्विंशतिनामभिर्होमः

ॐ केशवाय नमः स्वाहा
ॐ नारायणाय नमः स्वाहा
ॐ माधवाय नमः स्वाहा
ॐ गोविन्दाय नमः स्वाहा
ॐ विष्णवे नमः स्वाहा
ॐ मधुसूदनाय नमः स्वाहा
ॐ त्रिविक्रमाय नमः स्वाहा
ॐ वामनाय नमः स्वाहा
ॐ श्रीधराय नमः स्वाहा
ॐ हृषीकेशाय नमः स्वाहा
ॐ पद्मनाभाय नमः स्वाहा
ॐ दामोदराय नमः स्वाहा
ॐ वासुदेवाय नमः स्वाहा
ॐ संकर्षणाय नमः स्वाहा
ॐ प्रद्युम्नाय नमः स्वाहा
ॐ अनिरुद्धाय नमः स्वाहा
ॐ पुरुषोत्तमाय नमः स्वाहा
ॐ अधोक्षजायनमः स्वाहा
ॐ नारसिंहाय नमः स्वाहा
ॐ अच्युताय नमः स्वाहा
ॐ जनार्दनाय नमः स्वाहा
ॐ उपेन्द्राय नमः स्वाहा
ॐ हरये नमः स्वाहा
ॐ श्रीकृष्णाय नमः स्वाहा
ॐ श्रीदेव्यै नमः स्वाहा
ॐ भूदेव्यै नमः स्वाहा
ॐ नीलादेव्यै नमः स्वाहा
ॐ गोदादेव्यै नमः स्वाहा

# अथ वैकुण्ठपार्षदनामहोमः

ॐ आधारशक्त्यै नमः स्वाहा ॐ प्रकृत्यै नमः स्वाहा

ॐ अखिलजगदाधाराय कूर्मरूपिणे नारायणाय नमः स्वाहा

ॐ अनन्ताय नागराजाय नमः स्वाहा

ॐ भूम्यै नमः स्वाहा

ॐ वैकुण्ठाय दिव्यलोकाय नमः स्वाहा

ॐ वैकुण्ठाय दिव्यजनपदाय नमः स्वाहा

ॐ वैकुण्ठाय दिव्यनगराय नमः स्वाहा

ॐ वैकुण्ठाय दिव्यविमानाय नमः स्वाहा

ॐ आनन्दमयाय दिव्यमण्डपरत्नाय नमः स्वाहा

ॐ आस्तरणरूपिणे अनन्ताय नागराजाय नमः स्वाहा

ॐ धर्माय पीठपादाय नमः स्वाहा

ॐ ज्ञानाय पीठपादाय नमः स्वाहा

ॐ वैराग्याय पीठपादाय नमः स्वाहा

ॐ ऐश्वर्याय पीठपादाय नमः स्वाहा

ॐ ऋग्वेदाय पीठवाहकाय नमः स्वाहा

ॐ यजुर्वेदाय पीठवाहकाय नमः स्वाहा

ॐ सामवेदाय पीठवाहकाय नमः स्वाहा

ॐ अथर्ववेदाय पीठवाहकाय नमः स्वाहा

ॐ अधर्माय पीठगात्राय नमः स्वाहा

ॐ अज्ञानाय पीठगात्राय नमः स्वाहा

ॐ अवैराग्याय पीठगात्राय नमः स्वाहा

ॐ अनैश्वर्याय पीठगात्राय नमः स्वाहा

ॐ एभिःपरिच्छिन्नतनवे सदसदात्मकाय पीठभूताय-

नागराजाय नमः स्वाहा

ॐ पीठस्योपरि अष्टदलपद्माय नमः स्वाहा

ॐ सोममण्डलाय नमः स्वाहा

ॐ सूर्यमण्डलाय नमः स्वाहा

ॐ वह्निमण्डलाय नमः स्वाहा

ॐ विमलायै चामरकरायै नमः स्वाहा

ॐ क्रियायै चामरकरायै नमः स्वाहा

ॐ उत्कर्षिण्यै चामरकरायै नमः स्वाहा

ॐ ज्ञानायै चामरकरायै नमः स्वाहा

ॐ प्रह्व्यै चामरकरायै नमः स्वाहा

ॐ ईशानायै चामरकरायै नमः स्वाहा

ॐ सत्यायै चामरकरायै नमः स्वाहा

ॐ योगायै चामरकरायै नमः स्वाहा

| | | |
|---|---|---|
| ॐ अनुग्रहायै चामरकरायै | नमः | स्वाहा |
| ॐ जगत्प्रकृतये चामरकराय | नमः | स्वाहा |
| ॐ सहस्रशीर्ष्णे अनन्ताय | नमः | स्वाहा |
| ॐ पुरतः पादपीठाय | नमः | स्वाहा |
| ॐ भगवद्पादुकाभ्यां | नमः | स्वाहा |
| ॐ अस्मद्गुरुभ्यो | नमः | स्वाहा |
| ॐ अस्मत्परमगुरुभ्यो | नमः | स्वाहा |
| ॐ अस्मत्सर्वगुरुभ्यो | नमः | स्वाहा |
| ॐ श्रीमते रामानुजाय | नमः | स्वाहा |
| ॐ महापूर्णाय | नमः | स्वाहा |
| ॐ श्रीमद्यामुनमुनये | नमः | स्वाहा |
| ॐ श्रीराममिश्राय | नमः | स्वाहा |
| ॐ श्रीपुण्डरीकाक्षाय | नमः | स्वाहा |
| ॐ श्रीमन्नाथमुनये | नमः | स्वाहा |
| ॐ श्रीमतेशठकोपाय | नमः | स्वाहा |
| ॐ श्रीमतेविष्वक्सेनाय | नमः | स्वाहा |
| ॐ श्रियै | नमः | स्वाहा |
| ॐ श्रीधराय | नमः | स्वाहा |
| ॐ सुदर्शनाय हेतिराजाय | नमः | स्वाहा |

| | | |
|---|---|---|
| ॐ पाञ्चजन्याय शंखाधिपतये | नमः | स्वाहा |
| ॐ कौमोदक्यै गदाधिपतये | नमः | स्वाहा |
| ॐ नन्दकाय खड्गाधिपतये | नमः | स्वाहा |
| ॐ शार्ङ्गाय चापाधिपतये | नमः | स्वाहा |
| ॐ श्रीवत्साय श्रीनिवासाय | नमः | स्वाहा |
| ॐ कौस्तुभाय सर्वरत्नाधिपतये | नमः | स्वाहा |
| ॐ वैजयन्त्यै वनमालायै | नमः | स्वाहा |
| ॐ ह्रीं पुष्ट्यै | नमः | स्वाहा |
| ॐ ऐं सरस्वत्यै | नमः | स्वाहा |
| ॐ द्रां निद्रायै | नमः | स्वाहा |
| ॐ क्लीं कान्त्यै | नमः | स्वाहा |
| ॐ कं पृथिव्यै | नमः | स्वाहा |
| ॐ गं गरुडाय | नमः | स्वाहा |
| ॐ किरीटाय मुकुटाधिपतये | नमः | स्वाहा |
| ॐ मकराकृतिकुण्डलाभ्यां | नमः | स्वाहा |
| ॐ कण्ठिकाभरणाय | नमः | स्वाहा |
| ॐ किरीटमालायै आपीडात्मिकायै | नमः | स्वाहा |
| ॐ श्रीमत्तुलस्यै | नमः | स्वाहा |
| ॐ हाराय सर्वाभरणाधिपतये | नमः | स्वाहा |

ॐ काञ्चीगुणोज्वलाय पीताम्बराय नमः स्वाहा

ॐ सर्वेभ्यो भगवद्भूषणेभ्यो नमः स्वाहा

ॐ सर्वेभ्यो भगवद्दिव्यायुधेभ्यो नमः स्वाहा

ॐ सर्वाभ्यो भगवत्पादसंवाहिनीभ्यो नमः स्वाहा

ॐ सर्वेभ्यो भगवत्परिकरेभ्यो नमः स्वाहा

ॐ अनन्ताय नमः स्वाहा

ॐ विष्वक्सेनाय नमः स्वाहा

ॐ सूत्रवत्यै नमः स्वाहा

ॐ जं जयत्सेनाय नमः स्वाहा

ॐ गं गजाननाय नमः स्वाहा

ॐ हं हयाननाय नमः स्वाहा

ॐ कं कालप्रकृतिसंज्ञाय नमः स्वाहा

ॐ सर्वेभ्यो विष्वक्सेनपरिजनेभ्यो नमः स्वाहा

ॐ चण्डाय नमः स्वाहा ॐ प्रचण्डाय नमः स्वाहा

ॐ भद्राय नमः स्वाहा ॐ सुभद्राय नमः स्वाहा

ॐ जयाय नमः स्वाहा ॐ विजयाय नमः स्वाहा

ॐ धात्रे नमः स्वाहा ॐ विधात्रे नमः स्वाहा

ॐ कुमुदाय सायुधाय सपरिवाराय सशक्तिकाय नमः स्वाहा

ॐ कुमुदाक्षाय सायुधाय सपरिवाराय सशक्तिकाय नमः स्वाहा

ॐ पुण्डरीकाय सायुधाय सपरिवाराय सशक्तिकाय नमः स्वाहा

ॐ वामनाय सायुधाय सपरिवाराय सशक्तिकाय नमः स्वाहा

ॐ शङ्कुकर्णाय सायुधाय सपरिवाराय सशक्तिकाय नमः स्वाहा

ॐ सर्पनेत्राय सायुधाय सपरिवाराय सशक्तिकाय नमः स्वाहा

ॐ सुमुखाय सायुधाय सपरिवाराय सशक्तिकाय नमः स्वाहा

ॐ सुप्रतिष्ठिताय सायुधाय सपरिवाराय सशक्तिकाय नमः स्वाहा

ॐ सर्वेभ्यो भगवद्गणाधिपतिभ्यो नमः स्वाहा

ॐ नित्येभ्यो नमः स्वाहा

ॐ मुक्तेभ्यो नमः स्वाहा

ॐ दिव्येभ्यो नमः स्वाहा

ॐ समस्तपरिवाराय श्रीमते नारायणाय नमः स्वाहा

## अथाष्टवसुहोमः

ॐ सुगावो देवा सदनाऽअकर्मयऽआजग्मेद ँ सवनञ्जुषाणाः । भरमाणाव्वहमानाहवी ँ ष्यस्मेधत्तवसवो व्वसूनि स्वाहा । ॐ अष्टवसुभ्यो नमः स्वाहा ॥

# दिक्पालहोमः

ॐ त्रातारमिन्द्रमवितारमिन्द्र ँ हवेहवेसुहव ँ शूरमिन्द्रम् ।
ह्वयामि शक्रं पुरुहूतमिन्द्र ँ स्वस्तिनो मघवा धात्विन्द्रः ॥

ॐ इन्द्राय सशक्तिकाय भगवत्पार्षदाय नमः स्वाहा ॥

ॐ त्वन्नोऽअग्ने वरुणस्य विद्वान्देवस्यहेडोऽअवयासि सीष्ठाः ।
यजिष्ठो वह्नितम शोशुचानोविश्वाद्वेषा ँ सि प्रमुमुग्ध्यस्मत् ॥

ॐ अग्नये सशक्तिकाय भगवत्पार्षदाय नमः स्वाहा ॥

ॐ अद्यादेवाऽउदितासूर्यस्यनिर ँ हसः पिपृता निरवद्यात् ।
तन्नोमित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवीऽउतद्यौः ॥

ॐ सूर्याय सशक्तिकाय भगवत्पार्षदाय नमः स्वाहा ॥

ॐ सुगन्नः पन्थाऽअभयं कृणोतु यस्मिन्नक्षत्रे यमराजातिराजा ।
यस्मिन्नेनमभिषिञ्चन्ति देवास्तदस्य चित्र ँ हविषा यजामः ॥

ॐ यमाय सशक्तिकाय भगवत्पार्षदाय नमः

ॐ असुन्वन्तमयजमानमिच्छँस्तेनस्येत्यामन्विहितस्करस्य ।
अन्यमस्मदिच्छ सातऽइत्या नमोदेवि निर्ऋते तुभ्यमस्तु ॥

ॐ निर्ऋतये सशक्तिकाय भगवत्पार्षदाय नमः स्वाहा ॥

ॐ तन्मित्रस्य वरुणस्याभिचक्षे सूर्योरूपङ्कृणुते द्योरुपस्थे ।

अनन्तमन्यद्रुशदस्यपाजः कृष्णमन्यद्धरितः संभरन्ति ॥

ॐ अनन्ताय सशक्तिकाय भगवत्पार्षदाय नमः स्वाहा ॥

ॐ तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणे हवोध्युरुश ँ समान आयुः प्रमोषीः ॥

ॐ वरुणाय सशक्तिकाय भगवत्पार्षदाय नमः स्वाहा

ॐ आनोनियुद्भिःशतिनीभिरध्वर ँ सहस्रिणीभिरुपयाहि यज्ञम् ।
वायो अस्मिन् सवनेमादयस्व यूयं पातस्वस्तिभिः सदा नः ।

ॐ वायवे सशक्तिकाय भगवत्पार्षदाय नमः स्वाहा ॥

ॐ राजाधिराजाय प्रसह्यसाहिने नमोवयं वैश्रवणाय कुर्महे । स मे
कामान्कामकामाय मह्यं कामेश्वरो वैश्रवणो ददातु ॥

ॐ वैश्रवणाय सशक्तिकाय भगवत्पार्षदाय नमः स्वाहा ॥

ॐ सोमोधेनु ँ सोमोऽअर्वन्तमाशु ँ सोमोवीरङ्कर्मण्यं ददाति ।
सादन्यं विदध्य ँ सभेयं पितृश्रवणं यो ददाशदस्मै ॥

ॐ सोमाय सशक्तिकाय भगवत्पार्षदाय नमः स्वाहा ॥

ॐ तमीशानञ्जगतस्तस्थुषस्पतिन्धियं जिन्वमवसेहूमये वयम् ।
पूषानो यथा वेद साम सद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥

ॐ ईशानाय सशक्तिकाय भगवत्पार्षदाय नमः स्वाहा ॥

ॐ ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोवेनऽआवः ।
सबुध्न्याऽउपमाऽअस्य विष्ठासतश्चयोनिमसतश्च विवः ॥

ॐ ब्रह्मणे सशक्तिकाय भगवत् पार्षदाय नमः स्वाहा ॥

# अथ प्रायश्चित्तहोमः

ततो हस्ते जलाक्षतानादाय संकल्पयेत् । ॐ अस्यमुककर्माङ्गहोमकर्मणोमध्येसंभवन्मन्त्रविधिविपर्यासन्यूनातिरिक्त स्वराक्षरव्यत्यासप्रायश्चितार्थमाहुतीर्होष्यामि ।

**इति संकल्प्य श्रुवेणाज्यमादाय जुहुयात्—**

ॐ अनाज्ञातं यदज्ञातं यज्ञस्य क्रियते मिथः । अग्नेतदस्यकल्पय त्व ँ हि वेत्थ यथातथम् ॥ॐ अग्नये स्वाहा अग्नये इदं न मम ॥

ॐ पुरुषसम्मितो यज्ञो यज्ञः पुरुष संमितः । अग्नेतदस्य कल्पय त्व ँ हि वेत्थ यथातथम् ॥ॐ अग्नये स्वाहा अग्नये इदं न मम ॥

ॐ यदविद्वांसो यद्विद्वांसो मुग्धाः कुर्वन्ति ऋत्विजः । अग्निर्म्मातस्म्मादेनसः श्रद्धा देवी च मुञ्चताम् ॥ ॐ अग्नये श्रद्धादेव्यै च स्वाहा, अग्नये श्रद्धादेव्यैइदं न मम ॥

**ततः सिततिलाज्याभ्यामष्टोत्तरशताहुतीर्जुहुयात्—**

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् । उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् ॥ ॐ त्र्यम्बकाय नमः स्वाहा, त्र्यम्बकाय इदं न मम ॥

**अथ घृतेनाष्टोत्तरशताहुतीर्जुहुयात्—**

ॐ इदं विष्णुर्विचक्रमेत्रेधानिदधे पदम् । समूढमस्यपा ँ सुरेस्वाहा ।

ॐ विष्णवे नमः स्वाहा विष्णवे इदं न मम ॥

ततो घृतेन जुहुयात्-

ॐ स्वस्तिदा विशस्पति वृत्रहा विमृधो वशी। वृषेन्द्रः पुरऽएतुनः स्वस्तिदाऽअभयङ्करः ॥ ॐ इन्द्रायाभयङ्कराय स्वाहा इन्द्राय इदं न मम ॥

ॐ पुनस्त्वादित्या रुद्रावसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः। घृतेन त्वं तन्वो वर्द्धयस्व सत्याःसन्तु यजमानस्य कामाः ॥

ॐ अग्नये वसुनीताय स्वाहा अग्नये वसुनीतायेदं न मम इति ॥

## अथ स्विष्टकृद्धोमः

ॐ यदस्य कर्मणोऽअत्यरीरिचं यद्वान्यून मिहाकरम्। अग्निष्टुत् स्विष्टकृद्विद्वान् सर्वं स्विष्टं सुहुतं करोतु ॥ ॐ अग्नये स्विष्टकृते स्वाहा अग्नये स्विष्टकृते इदं न मम ॥

ॐ भूः स्वाहा अग्नये इदं न मम। ॐ भुवः स्वाहा वायवे इदं न मम। ॐ स्वःस्वाहा सूर्याय इदं न मम ॥

ॐ त्वन्नोऽअग्ने वरुणस्य विद्वान् देवस्यहेडोऽअवयासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानोविश्वद्वेषा ँ सि प्रमुमुग्ध्यस्मत् ॥

ॐ अग्नीवरुणाभ्यां स्वाहा अग्नीवरुणाभ्यामिदं न मम।

ॐ सत्वन्नोऽअग्ने वमो भवोति नेदिष्ठोऽअस्याऽउषसोव्युष्टौ। अवयक्ष्वनोवरुण ँ रराणो वीहि मृडीक ँ सुहवोनऽएधि ॥ ॐ अग्नीवरुणाभ्यां स्वाहा अग्नीवरुणाभ्यामिदं न मम।

ॐ अयाश्चाग्ने स्यनभिशस्तिपाश्च सत्यमित्वमयाऽअसि । अयानो यज्ञम्वहास्यसानो धेहि भेषजठ स्वाहा ॥

ॐ अग्नये अयसे स्वाहा अग्नये अयसे इदं न मम ॥

ॐ ये ते शतं वरुणं ये सहस्रं यज्ञियाःपाशा विततामहान्तः । तेभिर्नोऽअद्य सवितोततद्विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः ॥ ॐ वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च स्वाहा इदं वरुणादिभ्यो न मम ॥

ॐ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यम ँ श्रथाय। अथावय मादित्यव्रतेतवानागसोऽअदितये स्याम ॥ ॐ आदित्यायादितये स्वाहा इदं न मम। इति ॥

## अथ कर्मसाद्गुण्यहोमः

| | |
|---|---|
| ॐ केशवाय नमः स्वाहा | ॐ पद्मनाभाय नमः स्वाहा |
| ॐ नारायणाय नमः स्वाहा | ॐ दामोदराय नमः स्वाहा |
| ॐ माधवाय नमः स्वाहा | ॐ वासुदेवाय नमः स्वाहा |
| ॐ गोविन्दाय नमः स्वाहा | ॐ संकर्षणाय नमः स्वाहा |
| ॐ विष्णवे नमः स्वाहा | ॐ प्रद्युम्नाय नमः स्वाहा |
| ॐ मधुसूदनाय नमः स्वाहा | ॐ अनिरुद्धाय नमः स्वाहा |
| ॐ त्रिविक्रमाय नमः स्वाहा | ॐ पुरुषोत्तमाय नमः स्वाहा |
| ॐ वामनाय नमः स्वाहा | ॐ अधोक्षजाय नमः स्वाहा |
| ॐ श्रीधराय नमः स्वाहा | ॐ नारसिंहाय नमः स्वाहा |
| ॐ हृषीकेशाय नमः स्वाहा | ॐ अच्युताय नमः स्वाहा |

ॐ जनार्दनाय नमः स्वाहा ॐ हरये नमः स्वाहा
ॐ उपेन्द्राय नमः स्वाहा ॐ श्रीकृष्णाय नमः स्वाहा

## अथ पूर्णाहुतिः

दर्व्याज्येन स्रुचं चतुःकृत्वः पूरयित्वा तत्र ताम्बूलपूगीफलश्री फलानि निधाय नववस्त्रेणाच्छाद्य चित्रतन्तुभिरावेष्ट्य पुनराज्येनाभ्यज्य पुष्पादिभिरलङ्कृत्य उत्तिष्ठन् मनसा यज्ञपुरुषं ध्यायन् पूर्णाहुतीः कुर्यात्—

ॐ यत्तेदेवाऽअदधुर्भागधेयममावास्येव संवसन्तो महित्वा। सानो यज्ञं पिपृहि विश्ववरेण्यं नो धेहि सुभगे सुवीरम् ॥

ॐ पूर्णः पश्चादुत पूर्णः पुरस्तादुन्मध्यतः पौर्णमासीर्जिगाय । तस्यादेवाऽअधिवसन्तऽउत्तमेनाकऽइहमादयन्ताम् ॥

ॐ सप्ततेऽअग्ने समिधः सप्तजिह्वा सप्त ऋषयः सप्तधाम प्रियाणि । सप्तहोत्रा सप्तधा त्वा यजन्ति सप्तयोनीरापृणस्व घृतेन ।ॐ अग्नये पूर्णाय सप्तवते स्वाहा, अग्नये पूर्णाय सप्तवते इदं न मम इति जुहुयात्।

## अथोत्तरपरिषेचनम्

जलपूर्णाम्प्रणीतां दक्षिणहस्तेनादाय—

ॐ अदिते अनुमन्यस्व इति कुण्डस्यदक्षिणतःप्राचीनां जलधारांकुर्यात्।

ॐ अनुमते अनुमन्यस्व इति पश्चिमत उदीचीनां जलधारां कुर्यात् ।

ॐ सरस्वते अनुमन्यस्व इत्युत्तरतः प्राचीनां जलधारां विधाय।

ॐ देवसवितः प्रसुवः ।

इति प्रागारभ्य प्रदक्षिणक्रमेण सर्वतोजलधारया परिषिञ्चेत् । प्रणीतापात्रं स्वस्य पुरतो निधाय तत्र –

ॐ सदसि सन्मे भूयाः सर्वमसि सर्वम्मे भूयाः पूर्णमसि पूर्णम्मे भूयाः अक्षतमसि मामेक्षेष्टाः ॥

इति मन्त्रेण जलान्तरं निनीय तज्जलं हस्ताभ्यामादाय –

ॐ देवा ऋषयो मार्जयन्तामिति पूर्वस्यां किञ्चिज्जलं निरस्येत् ।

ॐ मासा पितरो मार्जयन्तामिति दक्षिणस्यां किञ्चिज्जलं निरस्येत् ।

ॐ गृहाः पशवो मार्जयन्तामिति प्रतीच्यां । किञ्चिज्जलं निरस्येत् ।

ॐ आप ओषधयो वनस्पतयो मार्जयन्तामित्युदीच्याञ्च किञ्चिज्जलं निरस्येत् ॥

ॐ यज्ञः संवत्सरो यज्ञपतिर्मार्जयन्तामित्यूर्ध्वायां दिशि किञ्चिज्जलं निरस्य– ॐ सुमित्रियानऽआपऽओषधयः सन्तु

इति मस्तके पुरस्ताद्भूमौ च सहिरण्यं किञ्चिज्जलं निरस्यावशिष्टजलेन–

ॐ दुर्म्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यञ्चवयं द्विष्मः ।

इति प्रणीतां न्युब्जीकुर्यात्–

## अथदिक्पालबलिः

मण्डलस्य चतुर्दिक्षु पूर्वादि क्रमेण दध्यक्षतमाषबलिं दद्यात् ।

ॐआद्याश्च कर्मजाश्चैव ये भूताः प्राक् दिशिस्थिताः ।

प्रसन्नाः परितुष्टाश्च गृह्णन्तु बलिमुत्तमम् ॥

ॐ वृक्षेषु पर्वताग्रेषु ये विदिक्षु च संस्थिताः ।
भूमौ व्योम्नि स्थिता ये च गृह्णन्तु बलिमुत्तमम् ॥
ॐ विनायकाः क्षेत्रपाला ये चान्ये बलिकांक्षिणः ।
पूषाद्याः पार्षदाश्चैव प्रतिगृह्णन्तु ते बलिम् ॥
ॐ कुमुदाद्याश्च ये भूताः सर्वतो दिक्षु संस्थिताः ।
आगच्छन्तु च ते सर्वे गृह्णन्तु बलिमुत्तमम् ॥

**ततः अन्नपूर्णपात्रं ब्रह्मणे समर्पयेत्—**

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

**ततः पूर्वोक्तप्रकारेण यज्ञान्तगोदानं कृत्वा विशेषारतीं च विधाय मन्त्र पुष्पाञ्जलिंविधायअर्चनादिकंकृत्वाभगवन्तंशालग्रामंयथास्थानेस्थापयित्वा गन्धपुष्पादिभिः ब्रह्माणं पूजयेत्—**

## ब्रह्मविसर्जनम्

**ॐ ब्रह्मणे नम इति ब्रह्माणं पूजयित्वा वक्ष्यमाणमन्त्रं पठन्**

ॐ स्तुता मया वरदा देवमाता प्रचोदयन्ति पवने द्विजाताः ।आयुः पृथिव्यां द्रविणं ब्रह्मवर्चसं मह्यं दत्वा प्रयातु ब्रह्मलोकम् ॥

ॐ भगवन् देवदेवेश जगतामार्तिनाशन ।
व्रजस्व पूजामादाय पुनरागमनाय च ॥

ॐ यज्ञयज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा।
एषते यज्ञो यज्ञपते सहसूक्तवाकः सर्ववीरस्तं जुषस्व स्वाहा॥

## अथपरिधिहोमः

**ततः परिधीनाधारसमिधः पस्तिरणकुशांश्चादाय –**

ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत।
अरिष्टास्माकं वीरा मापरासे चिमत्पयः॥

**इत्यनेन मन्त्रेण वह्नौ क्षिपेत्॥ ततः प्राञ्जलिः प्रार्थयेत्—**

ॐ अग्नेनय सुपथारायेऽअस्मान्विश्वानि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमऽउक्तिं विधेम॥

ॐ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च।
हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं यदर्चितम्।
यद्धुतं च मया देव परिपूर्णं तदस्तु ते॥
प्रायश्चित्तान्यशेषाणि तपः कर्मात्मकानि च।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम्॥
यस्यस्मृत्या च नामोक्त्या जपहोमक्रियादिषु।
न्यूनं संपूर्णतां याति सद्यो वन्देतमच्युतम्॥
प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्।
स्मरणादेव तद्विष्णोः संपूर्णंस्यादिति श्रुतिः॥

ततो हस्ते जलाक्षतानादाय–

यथाशक्तिकृतेनानेन होमकर्मणा यज्ञ स्वरूपी श्रीमन्नारायणः परमात्मा प्रीयताम् ।

इति जलाक्षतान् भूमौ निक्षिपेत् ॥ ततो होमकाले जुह्वतां ऋत्विजां हस्तात् कुण्डाद्बहिर्यद्धविः पतितं तत्सर्वं संगृह्य शुद्धजले नद्यादौ निक्षिपेत्–

ऋत्विजां जुह्वतां वह्नौ बहिः पततिं यद्धविः ।
स ज्ञेयो वारुणोभागः प्रक्षेप्यो विमले जले ॥

इति स्मरणात् । ततो ब्राह्मणभोजनम् । यदि विशेषः तर्हि तीर्थादौ नद्यादौ गत्वा स्नायात् न चेत् पूर्णकुम्भजलेन यजमानम् ब्राह्मणा अभिषिञ्चेयुः ।

इत्युभयवेदान्तविशारदैः श्रीस्वामी सुदर्शनाचार्यकृपापात्रैः
स्वामी श्रीपराङ्कुशाचार्यवर्यैः प्रसादिता
श्रीवैष्णवीयहवनपद्धतिः
समाप्ता ॥

अथ परिशिष्टम्

# प्रमाणप्रकरणम्

**चक्रादिचिह्नरहितेन स्थापिते स्थाने हरिर्नायातिः–**

चक्रादि चिह्नहीनेन स्थापिते यत्र विग्रहे।
न सान्निध्यं हरिर्याति क्रियाकोटिशतैरपि॥

**शङ्खचक्रादि चिह्नशून्येन द्विजेन कृतं सर्वं सत्कर्म महाहानिप्रदं भवतिः–**

शङ्खचक्रोर्ध्वपुण्ड्रादि चिह्नेन रहितैर्द्विजैः।
यद्यत्कर्मकृतं तत्तु महाहानिप्रदं भवेत्॥

**विप्राणां सकामानामकामानां च चतुरस्रं कुण्डं कर्तव्यम्–**

विप्राणां चतुरस्रं तु मखे निष्कामकामयोः–

**पाञ्चरात्रे कुण्डशरीरम्–**

प्राच्यां शिरः समाख्यातं बाहू दक्षिणसौम्ययोः।
उदरं कुण्डमित्युक्तं योनिः पादौः तु पश्चिमे॥

**पाञ्चरात्रे पाद्मे कुण्डाङ्गलक्षणम्–**

तदैन्द्री मेखलापादौ भुजौ तु दक्षिणोत्तरे।
पश्चिमा पृष्ठमित्युक्तं शिरस्तद्योनिरुच्यते॥

कुम्भस्तु तस्य वक्त्रं स्यादक्षतं गण्डमेव च।

तत्पुष्पं दृष्टिरित्युक्तं तदग्रं वक्षरुच्यते ।

तल्लेपनं मृदम्भः स्यादिन्धनं चास्थिसंज्ञितम्

आज्यं रुधिरमेवोक्तं तद्गन्धो वक्त्रमुच्यते॥

अनलं प्राणमेवोक्तं तज्ज्वालामुखजिह्विका।

दर्भास्तु केशा इत्युक्ता परिधिर्बाहुरुच्यते॥

**मुमुक्षूणां वैष्णवानां चतुरस्रं कुण्डम्-**

मुमुक्षूणां वैष्णवानां चतुरस्रं प्रकीर्तितम्॥

**पाञ्चरात्रे पुत्रेष्ट्यै तु चतुर्वर्णानामपि योनिकुण्डम्-**

पुत्रार्थन्तु चतुर्णां वै योनिकुण्डं प्रकीर्तितम्।

**एवं शान्तिकर्मणि वर्तुलम्, वृष्ट्यर्थं पद्माकृतिं रोगनाशाय च अष्टास्रं कुण्डं परिकल्पयेत्। पूजान्ते होमः कर्त्तव्यः-**

पूजान्ते सर्वदा होमो ब्राह्मणस्य विधीयते।

होमान्ते पितृयागः स्यात् प्रद्युम्नादिधिया द्विजाः॥

वैष्णवेष्टिश्च कर्तव्या ह्याज्ञेयं परमात्मनः।

कुर्यान्नचेदधोयाति नारायणपराङ्मुखः॥

**विप्राणां शास्त्रज्ञानमावश्यकम्–**

श्रुतिस्मृती उभे नेत्रे विप्राणां परिकीर्तिते।
एकेन विकलः काणो द्वाभ्यामन्धः प्रकीर्तितः॥

**ऋतुकाले नारीणां सप्ताहादेव देवपितृकार्येऽधिकारः–**

ऋतुकाले च नारीणां त्यजेद्दिनचतुष्टयम्।
तावन्नालोकयेद्वक्त्रं पापं वपुषि संस्थितम्॥
स्नात्वा सचैलं सा नारी चतुर्थेऽहनि शुध्यति।
सप्ताहात् पितृदेवानां भवेद्योग्या व्रतार्चने॥

**होमयज्ञः सर्वैः कार्यः–**

अग्नौ यद्धूयते हव्यं विष्णवे परमात्मने॥
तद्धविर्वैष्णवं प्रोक्तं सर्वदेवोपजीवनम्॥
एतदेव हि कुर्वन्ति सदा नित्या अपीश्वराः।
विमुक्ता अपि भोगार्थमेतदेव मुमुक्षवः॥

**योगक्षेमार्थेऽपि होमयज्ञः कर्तव्य एव–**

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः॥
कर्मब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्॥

अग्नौ प्रास्ताहुतिस्सम्यगादित्यमुपतिष्ठते।

आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः॥

**अग्निहोत्रं विना न तुष्यति हरिः-**

एतद्विना न तुष्येत भगवान् पुरुषोत्तमः।

**यज्ञस्वरुपं ज्ञात्वैव जुहुयात् न चेत् पतेत्-**

वह्निर्जिह्वा भगवतो वेदा अङ्गाः सदाध्वरे।

अस्थीनि समिधः प्रोक्ता रोमादर्भाः प्रकीर्तिताः॥

स्वाहाकारः शिरः प्रोक्तं प्राणा एव हवींषि च।

सर्ववेदक्रियाभोगा मन्त्राः पत्न्यः प्रकीर्तिताः॥

एवं यज्ञवपुर्विष्णुर्विदित्वैनं हुताशने।

जुहुयाद्वै पुरोडाशमज्ञात्वैनं पतेदधः॥

**अग्निहोत्रशून्यस्य, उभयलोकशून्यत्वम्-**

नायं लोकोऽस्त्ययज्ञस्य कथं स्यात् परतः शुभः।

**होमादिकर्म भगवत्कैंकर्यरूपेणैव कुर्यात्-**

हरेर्भोगतया कुर्यात् न साधनतया क्वचित्॥

हरेरङ्गरूपेण वैदिकदेवतान्तराराधने देवतान्तरशङ्का न कार्या देवतान्तरशङ्का तु न कर्तव्या हि वैदिकैः।

**अक्षता स्वरूपम्–**

तण्डुलाः सहरिद्रास्तु अक्षता इति कीर्तिताः ॥

**तर्पणे प्रमाणम्–**

आदौ नाम द्वितीयान्तं तर्पयामीतिचोच्चरन् ।
एष मन्त्रस्तु निर्दिष्टस्तर्पणेषु यथाक्रमम् ॥

**देवाग्निगुरुसन्निधानान्निर्गमनप्रकारः–**

पश्चाद्भागेन निर्गच्छेद्देवाग्निगुरुसन्निधौ ।

**कुण्डमानम्–**

होमे साष्टशते चैवमुष्ट्यरत्निसमं भवेत् ।
होमे सार्धशते चैव सारत्निः सकनिष्ठिका ॥
हस्तं सहस्रहोमे तु अयुताख्ये द्विहस्तकम् ।
लक्षहोमे चतुर्हस्तं कोटिहोमेऽष्टहस्तकम् ॥इति

**केवलभूमौ नाग्निश्चेतव्यः–**

भूमौ अग्निर्न चेतव्यः इति श्रुतेः ।
भूमा इत्यस्य केवलायां भूमावित्यर्थः ॥

**तप्ताङ्कनमुख्यकालः–**

जाते पुत्रे पिता स्नात्वा होमं कुर्याद्विधानतः ।
तेनाग्निनैव संतप्तचक्रेण भुजमूलयोः ।

अङ्कयित्वा शिशोः पश्चान्नामकुर्याच्च वैष्णवम्।

पश्चात्सर्वाणि कर्माणि कुर्वीतास्य विधानतः

अङ्कयित्वा न चक्रेण यत्किञ्चित्कर्म संचरेत्॥

तत्सर्वं याति वैकल्यमिष्टापूर्तादिकं नृप।

कारयेन्मन्त्रदीक्षायां चक्राद्याः पञ्चहेतयः।

चक्रं वै कर्मसिद्यर्थम् जातकर्माणि कारयेत्॥

**एवमेतद्ग्रन्थाधारभूत प्रमाणानि सत्शास्त्रेषूपलभ्यन्ते। विस्तरभयान्नाधिकमिह तन्यते।**

## वैष्णवेष्टिविधानम्—

(वृद्धहारितस्मृतेर्नवमेऽध्याये)

गुरूणामन्त्यदिवसे भगवज्जन्मवासरे।

कार्तिक्यांश्रावणे वापि कुर्यादिष्टिं च वैष्णवीम्॥

उपोष्य पूर्वदिवसे दीक्षितः सुसमाहितः।

स्वस्तिवाचनपूर्वेण कारयेदङ्कुरार्पणम्॥

नद्यां स्नात्वा च ऋत्विग्भिश्चतुर्भिर्वेदपारगैः।

पौरुषेण विधानेन पूजयेत्पुरुषोत्तमम्॥

गन्धैर्नानाविधैः पुष्पैर्धूपदीपैर्निवेदनैः ।
फलैश्च भक्ष्यभोज्यैश्च ताम्बूलाद्यैः प्रपूजयेत् ॥
ऋग्वेदसंहितायाश्च प्रत्यृचं कुसुमैर्यजेत् ।
अर्घ्याद्यैरुपचारैस्तु सूक्तान्ते पूजयेद्धरिम् ॥
अध्यायान्ते मण्डलान्ते नैवेद्यैर्विविधैरपि ।
पूजयित्वा हरिं भक्त्या वैष्णवान्भोजयेत्तथा ॥
आज्येन चरुणा वापि तिलैः पद्मैरथापि वा ।
समिद्भिर्विल्बपत्रैर्वा होमं कुर्वीत वैष्णवः ॥
यज्ञरूपं हरिं ध्यायन्प्रत्यृचं वेदसंहिताम् ।
होमः समाप्यते यावत्तावद्वै दीक्षितो भवेत् ॥
जुहुयाद्वै गार्हपस्त्ये सोग्निमभ्यर्च्य भूतले ।
अग्ने रक्षणमप्युक्तं यावदिष्टिः समाप्यते ॥
विशिष्टान्वैष्णवान् विप्रान् भोजयेत्प्रतिवासरम् ।
ऋत्विग्गणः पठेत्तावच्चतुर्मन्त्रान्समाहितः ॥
अन्ते संपूजयेद्विप्रान् वासोऽलङ्कारभूषणैः ।
ऋत्विजश्च गुरूँश्चैव पूजयेच्च विशेषतः ।
एवमिष्टिं तु यः कुयद्विष्णवीं वैष्णवोत्तमः ॥

क्रतूनां दशकोटीनां फलं प्राप्नोत्यसंशयम्।
यस्मिन्देशे वैष्णवेष्ट्या पूजितो मधुसूदनः॥
दुर्भिक्षरोगाग्निभयं तस्मिन्नास्ति न संशयः।
अशक्तः सर्ववेदेन कर्तुमिष्टिं च वैष्णवीम्।
सर्वैश्च वैष्णवैः सूक्तैर्जुहुयात्प्रत्यृचं हविः।
पुष्पाञ्जलिञ्च तैरेव कुर्यादिष्ट्या प्रपूर्तये।
अथवा मूलमन्त्रेण लक्षं जप्त्वा हुताशने॥
अयुतं जुहुयात्तद्वत्पुष्पाणि च सनातने।
इष्टिः सम्पूर्णतां याति सर्ववेदाः सदक्षिणाः॥
एवमिष्टिं प्रकुर्वीत प्रत्यब्दं वैष्णवोत्तमः।
वृद्ध्यर्थमपि लोकस्य देवतानां हिताय च॥
अथ वक्ष्यामि राजर्षे वैष्णवेष्ट्या विधिं ततः।
श्रवणर्क्षे तु पूर्वाह्णे पूर्ववच्च समारभेत्॥
उपोष्य पूर्वदिवसे पूजयेज्जागरे हरिम्।
प्रभाते पूर्ववत्स्नात्वा तर्पयेज्जगतां पतिम्॥
षडक्षरविधानेन परव्योम्निस्थितं हरिम्।
वह्न्यर्कसोमबिम्बाद्यैर्योगपीठे सुसंस्थितम्॥

चतुर्भुजं सुन्दराङ्गं सर्वाभरणभूषितम्।
शंखचक्रगदाशार्ङ्गान् बिभ्राणं दोर्भिरायतैः ॥
वामाङ्कस्थश्रियासार्द्धं गन्धपुष्पाक्षतादिभिः।
नैवेद्यैश्च फलैर्भक्ष्यैर्दिव्यैर्भोज्यैः सुपानकैः ॥
अर्चयेद्देवदेवेशं सर्वाभरणसंयुतम्।
श्रीर्लक्ष्मीः कमला पद्मा सीता सत्या च रुक्मिणी।
सावित्री परितः पूज्या ततस्तु विमलादयः।
अनन्तताक्ष्र्यसेनेशसत्यधर्मदमाः शमः ॥
बुद्धिश्च पूजनीयास्ते दिक्षु सर्वास्वनुक्रमात्।
ततो लोकेश्वराः पूज्यास्ततश्चक्रादिहेतयः ॥
महाभागवताः पूज्या होमकर्म समाचरेत्।
चतुर्भिर्वैष्णवैः सूक्तैः प्रत्यृचं जुहुयाच्चरुम्।
व्यापका मन्त्ररत्नं च चतुर्मन्त्रा उदाहृताः।
तैरप्यष्टोत्तरशतं पृथक्पृथगतो यजेत् ॥
तृतीयमण्डलं पश्चाज्जुहुयात्प्रत्यृचं तथा।
तथा पुष्पैश्च सम्पूज्य कुर्यादवभृथं ततः ॥
समाप्य पुष्पयोगेन वैष्णवान्भोजयेत्ततः।

एवं कर्तुमशक्तश्चेद्वैष्णवीं वैष्णवोत्तमः ॥

वैष्णव्या चैव गायत्र्या पुष्पाञ्जल्ययुतं चरेत् ।

त्रिसहस्रं चरुं हुत्वा वैष्णवेष्टया फलं लभेत् ॥

इमां तु वैष्णवीमिष्टिं यः कुर्याद्वैष्णवोत्तमः ।

त्रिकोटिकुलमुद्धृत्य याति विष्णोः परं पदम् ॥

प्रायश्चित्तमिदं कुर्याद्भक्तिभङ्गेषु वैष्णवः ।

शान्त्यर्थन्देवकार्येषु पापेषु च महत्स्वपि ॥

इति वैष्णवेष्टिविधिः ॥

# सुमङ्गलस्तोत्रम्

सुमङ्गलं मङ्गलमीश्वराय ते सुमङ्गलं मङ्गलमच्युताय ते ।
सुमङ्गलं मङ्गलमन्तरात्मने सुमङ्गलं मङ्गलमब्जनाभ ते ॥

सुमङ्गलं श्रीनिलयोरुवक्षसे सुमङ्गलं पद्मभवादिसेविते ।
सुमङ्गलं पद्मजगन्निवासिने सुमङ्गलं चाश्रितमुक्तिदायिने ॥

चाणूरदर्पघ्नसुबाहुदण्डयोः सुमङ्गलं मङ्गलमादिपूरुष ।
बालार्ककोटिप्रतिमाय ते विभो चक्राय दैत्येन्द्रविनाशहेतवे ॥

शङ्खाय कोटिन्दुसमानतेजसे शार्ङ्गाय रत्नोज्ज्वलदिव्यरूपिणे ।
खड्गाय विद्यामयविग्रहाय ते सुमङ्गलं मङ्गलमस्तु ते विभो ॥

तदावयोस्तत्त्व विशिष्टशेषिणे शेषित्वसम्बन्धनिबोधनाय ते ।
यन्मङ्गलानां च सुमङ्गलाय ते पुनः पुनर्मङ्गलमस्तु सन्ततम् ॥

# मङ्गलआरतिः

श्रितकमला मुखमण्डल धृतकुण्डल ए।
कलितललित वनमाल जय जय देव हरे॥

दिनमणिमण्डल मण्डन भवखण्डन ए।
मुनिजनमानसहंस जय जय देव हरे॥

कालियविषधर गञ्जन जनरञ्जन ए।
यदुकुलनलिन दिनेश जय जय देव हरे॥

मधुमुरनरक विनाशन गरुडासन ए।
सुरकुलकेलि निदान जय जय देव हरे॥

अमलकमलदल लोचन भवमोचन ए।
त्रिभुवनभुवन निधान जय जय देव हरे॥

जनकसुताकृतभूषण जितदूषण ए।
समरशमितदशकण्ठ जय जय देव हरे॥


अभिनवजलधरसुन्दर धृतमन्दर ए।
श्रीमुखचन्द्रचकोर जय जय देव हरे॥

तव चरणे प्रणता वयम् इति भावय ए।
कुरु कुशलं प्रणतेषु जय जय देव हरे॥

श्रीजयदेवकवेरिदं कुरुते मुदम्।
मङ्गलमुज्ज्वलगीतं जय जय देव हरे॥

॥ श्रीमते रामानुजाय नमः ॥





श्रीमद्वेदमार्गप्रतिष्ठापनाचार्य
उभयवेदान्तप्रवर्तकाचार्य
श्रीमत्परमहंसपरिव्राजकाचार्य
अनन्तश्रीविभूषित त्रिदण्डी
पराङ्कुशाचार्य
(शठकोप) यतिराज
रामानुजजीयर स्वामीजी
महाराज

पुस्तक प्राप्ति स्थान –

**श्रीशुकदेव भागवत आश्रम**

**श्रीलक्ष्मीहरि मन्दिर**

गैंडाकोट–१, नवलपरासी (बर्दघाट सुस्तापूर्व)
गण्डकी प्रदेश, नेपाल
फोनः ०७८–५०१८९८

ISBN
9 789937 065320

upayogibooks.com